सुखदुःखानिभूतानामजरोजरयत्यसौ आदित्योस्तमेतिपुनः पुनरुदेतिच ७ अदृष्टपूर्वानादायभावानपरिशंकितान् दृष्टानि
हात्मनुष्याणामस्तंगच्छंतिरात्र्यः ८ योयमिच्छेद्यथाकामंकामानांतत्तदाप्नुयात् यदिस्यान्नपराधीनंपुरुषस्यक्रियाफलं ९ संयता
श्चहिदक्षाश्चमतिमंतश्चमानवाः दृश्यंतेनिष्फलाः संतः प्रहीणाः सर्वकर्मभिः १० अपरेबालिशाः संतोनिर्गुणाः पुरुषाधमाः आ
शीभिरप्यसंयुक्तादृश्यंतेसर्वकामिनः ११ भूतानामपरः कश्चिद्धिंसायांसततोत्थितः वंचनायांचलोकस्यससुखेष्वेवजीर्यते १२
अचेष्टमानमासीनंश्रीः कंचिदुपतिष्ठते कश्चित्कर्मानुसृत्यान्योनाप्राप्यमधिगच्छति १३ अपराधंसमाचक्ष्वपुरुषस्यस्वभावतः शु
क्रमन्यत्रसंभूतंपुनरन्यत्रगच्छति १४ तस्ययोनौप्रयुक्तस्यगर्भोभवतिवानवा आम्रपुष्पोपमायस्यनिवृत्तिरुपलभ्यते १५
केषांचित्पुत्रकामानामनुसंतानमिच्छतां सिद्धौप्रयतमानानांनचांडमुपजायते १६ गर्भाच्चोद्विजमानानांक्रुद्धादाशीविषादिव
आयुष्मान्जायतेपुत्रः कथंप्रेतइवाभवत् १७ देवानिष्ट्वातपस्तप्त्वाकृपणैः पुत्रगृद्धिभिः दशमासान्परिधृताजायंतेकुल
पांसनाः १८ अपरेधनधान्यानिभोगांश्चपितृसंचितान् विपुलानभिजायंतेलब्धास्तैरेवमंगलैः १९ ॥ ॥ ॥

मो०
४८

७१८

देहेन २

२० शीघ्रमिति परशरीराणि शरीरांतराणि प्राप्नुवंतीति शेषः छिन्नबीजं सर्गेनरकांकुरबीजं स्थूलशरीरं यस्य तत् शरीरिणां करा[illegible] प्राणसंरोध सति कीदृशं शरीरिणां तेषां सर्वेषा
[illegible] तादि युक्तेन वीमत्सेन चेष्टितं चेष्टा यस्य तं मरणोपि सद्यः शरीरांतरमायातीति देहबंधविच्छेदो न कदाचिदस्तीत्यर्थः २१ परदेहे देहांतरेणनिरु[illegible] ध्यं विनश्यंतं जीवं अभिलक्ष्य

वसि २

अन्योन्यं समभिप्रेतस्य मैथुनस्य समागमे। उपद्रवस्त्वविशिष्टो यो निगर्भः प्रपद्यते २० शीघ्रं परशरीराणि छिन्नबीजं शरीरिणां प्राणि
नं प्राणसंरोधमासंस्नेषु विचेष्टितं २१ निरुध्यं परदेहेति परदेहं चलाचलं विनश्यंतं विनाशांते नाविनाबाहितं २२ संगम्यान
उदरे मलरेतोभिर्बिंदुमचेतनं केनयत्नेन जीवंतं गर्भे त्वमिह पश्यसि २३ अन्नपानानि जीर्यंते यत्र भक्ष्याश्च भक्षिताः तस्मिन्नेवोद
रे गर्भः किं नान्नमिव जीर्यते २४ गर्भमूत्रपुरीषाणां स्वभावनियता गतिः धारणे वा विसर्गे वा न कर्ता विद्यते वशः २५ स्रवंति
ह्युदराद्गर्भा जायमानास्तथा परे आगमेन तथान्येषां विनाश उपपद्यते २६ एतस्माद्योनिसंबंधाद्यो बीजं परिमुच्यते प्रजां च
लभते कांचित्पुनर्द्वंद्वेषु सज्जति २७

[illegible] जीवं अभि[illegible] परे देहे देहांतरं चलाचलं परिणामितया निचपलं आहितं तउपस्थापितं भवति कर्मणोति शेषः २२ देहधारणमसाध्य
येति त्याह संगत्येति २३ २४ २५ २६ २७

रम०
४८

सततस्येतिसहजातस्यजन्मनादिप्रवाहसंबद्धस्येहस्य गर्भवासोजन्मबाल्यंकौमारंपौगंडंयौवनंस्थावीर्यंजराप्राणरोधोनाशश्चेतिदशाशरीरस्यदशास्तासांसप्तमीस्थाविर्यंतत्रपुत्र
दारकुटुंबभरणादिचिंतयाव्याकुलेसनवमींप्राणरोधः तांउभयींयंचमृतांस्यवप्राप्नुवंतिनसर्वेततः नवमींप्राप्यनभवंतिदशमींश्चभावदशांचप्राप्नुवंतीत्यर्थः गतायुषः

सततस्यसहजातस्यसप्तमींनवमींदशां प्राप्नुवंतिततः पंचत्वमवंतिगतायुषः २८ नास्मुत्स्थानेमनुष्याणांयोगाःसुनीतश्रेशयः व्या
धिभिश्चविमथ्यंतेव्याधैःक्षुद्रमृगाइव २९ व्याधिभिर्मथ्यमानानांत्यजतांविपुलंधनं वेदनांनापकर्षंतियतमानाश्चिकित्सका
ः ३० तेचापिनिपुणावैद्याःकुशलाःसंभृतौषधाः व्याधिभिःपरिकृष्यंतेमृगाव्याधैरिवार्दिताः ३१ तेपिबंतःकषायांश्चसर्पींषि
विविधानिच दृश्यंतेजरयाभग्नानगानागैरिवोत्तमैः ३२ केवाभुविचिकित्संतेरोगार्तान्मृगपक्षिणः श्वापदानिदरिद्रांश्चप्रायोना
र्ताभवंतिते ३३ घोरानपिदुराधर्षान्नृपतीनुग्रतेजसः आक्रम्याददतेरोगाः पशून्पशुगणाइव ३४ इतिलोकमनाक्रंदंमोह
शोकपरिप्लुतं स्रोतसासहसाक्षिप्तंह्रियमाणंबलीयसा ३५ नधनेननराज्येननोग्रेणतपसातथा स्वभावमतिवर्तंतेयेनियु
क्ताःशरीरिणः ३६ नम्रियेरन्नजीर्येरन्सर्वेस्युःसर्वकामिनः नाप्रियंप्रतिपश्येयुरुत्थानस्यफलेसति ३७ ॥ ॥ ॥

सततः तस्येतिसंबंधः २८ योगाःसामर्थ्यानि ३४ अनाक्रंदंवेदनयामूढं ३५ ३६ ३७ ॥ ॥ ॥ ॥

४८ असंश्लिष्टः सर्वाबाधविनिर्मुक्तः ४९ ५० ॥ ॥ ॥

उपर्युपरि लोकस्य सर्वो गंतुं समीहते यतते च यथाशक्ति न च तद्वर्त्तते तथा ३९ ऐश्वर्यमदमत्तांश्च मत्तान्मद्यमदेन च अप्रमत्ताः
शठाः शूरा विक्रान्ताः पर्युपासते ३९ क्लेशाः परिनिवर्त्तंते केषांचित् समीक्षिताः स्वंस्वं च पुनरन्येषां न किंचिदधिगम्यते ४० मह
च्चफलवैषम्यं दृश्यते कर्मसंधिषु वहंति शिबिकामन्ये यान्त्यन्ये शिबिकागताः ४१ सर्वेषामृद्धिकामानामन्ये रथपुरःसराः मनु
ष्याश्च गतस्त्रीकाः शतशो विविधास्त्रियः ४२ द्वंद्वारामेषु भूतेषु गच्छंत्येकैकशो नराः इदमन्यत्पदं पश्य मात्र मोहं करिष्यसि ४३ त्यज
धर्ममधर्मं च उभे सत्यानृते त्यज उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ४४ एतत्ते परमं गुह्यमाख्यातमृषिसत्तम येन देवाः परित्य
ज्य मर्त्यलोकं दिवं गताः ४५ नारदस्य वचः श्रुत्वा शुकः परमबुद्धिमान् संचिंत्य मनसा धीरो निश्चयं नाध्यगच्छत ४६ पुत्रदारैर्म
हान् क्लेशो विद्याभ्यासे महांछ्रमः किं नु स्याच्छाश्वतं स्थानमल्पक्लेशं महोदयं ४७ ततो मुहूर्तं संचिंत्य निश्चितां गतिमात्मनः परा
वरज्ञो धर्मस्य परां नैःश्रेयसीं गतिं ४८ कथं त्वहमसंश्लिष्टो गच्छेयं गतिमुत्तमां नावर्तेयं यथा भूयो योनिसंकरसागरे ४९ परं
भावं हि कांक्षामि यत्र नावर्त्तते पुनः सर्वसंगान्परित्यज्य निश्चितो मनसा गतिः ५० ॥ ॥ ॥ ॥ ।

५१ अवंबंधः नीचोदेहबंधः ५२ दिवाकरमितिअर्कमंडलांतर्वर्त्तीगमेः पदवाच्यः संसारबीजभंजनकर्त्तासर्वेषांप्राणिनांबुद्धेः प्रवर्त्तकोगायत्रीप्रतिपाद्योग्राह्यः
नतविचिरादिमार्गपर्वभर्गनमंडलाभिमानिनमादित्यंकृतएततत्कार्यब्रह्मलोकंप्रतितद्गमनस्यादर्शनात्स्तुकस्तमारुताद्धर्ध्वगतिकलांतरिक्षगा दर्शयितापमा

वं स्वंप्रस्थम् पोमयन्तेहेति णाव
रोबेशुद्धस्थमा १

तत्रयास्यामियत्रात्माराममेवाधिगमिष्यति अक्षयस्याव्ययस्यैवयत्रस्थास्यामिशाश्वतः ५१ नतुयोगमृतेशक्याप्राप्तुंसा
परमागतिः अवबंधोहिबुद्धस्य कर्मभिर्नोपपद्यते ५२ तस्माद्योगंसमास्थायसत्यक्त्वागृहकलेवरं वायुभूतः प्रवेक्ष्यामिते
जोराशिंदिवाकरं ५३ नेषोवक्षयतांयातिसोमः सुरगणैर्यथा कंपितः पततेभूमिंपुनश्चैवाधिरोहति ५४ क्षीयतेहि
सदासोमः पुनश्चैवाभिपूर्यते नेच्छाम्येवंविदित्वेतत्ह्रासवृद्धीपुनः पुनः ५५ रविस्तुसंतापयतेलोकान्रश्मिभिः
रुग्रवैरेः सर्वतस्तेजआदत्तेनित्यमक्षयमंडलः अतोमेरोचतेगंतुमादित्यंदीप्ततेजसं ५६ अत्रवत्स्यामिदुर्द्धर्षोनिः
शंकेनांतरात्मना सूर्यस्यसदनेचाहंनिक्षिप्येदंकलेवरं ५७ ॥ ॥ ॥ ॥ ॥ ॥

वदर्शनात्स्वसूर्यमंडलपर्यंतंगमनंतुस्वस्ययोगप्रभावदर्शनमात्रमितितुअत्रैवस्पष्टमस्ति ५३ आवृत्तिमार्गेनिंदति नहीतिसोमः सोमादिमार्गेगतासोम
लोकगत ः५४ तल्लोकाधिपत्तेर्हृद्धिह्रासवत्त्वात्तद्गतानामपितादृशाएवभवंतीत्याह क्षीयतेहीति ५६ अत्रवत्स्यामीतिलिंगान्नात्रमार्गपर्वभूतस्या
दित्योग्रह्यतेसर्पहारेणात्तेविरजाः प्रयांतीतिजन्यहारत्वमात्रमवगात ५७

सोरस्वर्गस्य मार्गदिग्गांतर्यामि यश्चादित्ये [illegible] तिष्ठन्नादित्यादंतरो यमादित्यो॰ मनवेदेत्यादिश्रुतेस्तत्तोऽस्मत् ६४ अध्यायः नि [illegible] ते सरो १ २ ३ ४

ऋषिभिः सहसायास्यामि सोऽरन्ते जोतिडः सहं आपृच्छामि नगान्नागानिरीनुर्वीं दिशो दिवं ५८ देवदानवगंधर्वान्पिशाचो
रगराक्षसान् लोकेषु सर्वभूतानि प्रवेक्ष्यामि न संशयः ५९ पश्यंतु योगवीर्यं मे सर्वे देवाः सहर्षिभिः अथानुज्ञाप्य तमृ
षिं नारदं लोकविश्रुतं ६० तस्मादनुज्ञां संप्राप्य जगाम पितरं प्रति सोभिवाद्य महात्मानं कृष्णद्वैपायनं मुनिं ६१ शुकः
प्रदक्षिणां कृत्वा कृष्णमापृष्टवान्मुनिं श्रुत्वा चर्षिस्तद्वचनं शुकस्य प्रीतो महात्मा पुनराह चैनं ६२ भो भो पुत्र स्थीयतां तावदद्य
यावच्चक्षुः प्रीणयामि त्वदर्थे निरपेक्षः शुको भूत्वा निःस्नेहो मुक्तसंशयः ६३ मोक्षमेवानुसंचिंत्य गमनाय मनो दधे पित
रं संपरित्यज्य जगाम मुनिसत्तमः कैलासपृष्ठं विपुलं सिद्धसंघनिषेवितं ६४ शांतौ मोक्षधर्मे शुकाभिगमने भीष्म उवाच
गिरिशृंगं समारुह्य सुतो व्यासस्य भारत समे देशे विविक्ते स निःशलाक उपाविशत् १ धारयामास चात्मानं यथाशास्त्रं
यथाविधि पादप्रभृति गात्रेषु क्रमेणाक्रमयोगवित् २ ततः स प्राङ्मुखो विद्वानादित्ये नाचिरोदिते पाणिपादं समादाय
विनीतव[illegible]दुपाविशत् ३ न तत्र पक्षिसंघातो न शब्दो नातिदर्शनं यत्र वैयासकिर्धीमान्योक्तुं समुपचक्रमे ४

११ व्यवसायेनसार्वांल्पनिश्चयेन १५ अधःकायातऊर्ध्ववक्त्रंपसा स्वेदत्तदृशिरतः स्वदेहस्याधोभागंनपश्यन्तीस्मयेः १६ १७

सदृष्ट्वासदृशात्मानंसर्वसंगविनिःसृतं प्रजहासततोहासंशुकःसंप्रेक्ष्यभास्करं ५ सपुनर्योगमास्थायमोक्षमार्गोपलब्धये महायोगेश्व
रोभूत्वासोत्यक्रामद्विहायसं ६ ततःप्रदक्षिणंकृत्वादेवर्षिंनारदंतदा निवेदयामासचतंस्वंयोगंपरमर्षये ७ शुकउवाच दृष्टोमार्ग
ःप्रवृत्तोस्मिस्वस्तितेस्तुतपोधन त्वत्प्रसादाद्गमिष्यामिगतिमिष्टांमहाद्युते ८ नारदेनाभ्यनुज्ञातःशुकोद्वैपायनात्मजः अभिवा
द्यपुनर्योगमास्थायाकाशमाविशत् ९ कैलासपृष्ठादुत्पत्यसपपातदिवंतदा अंतरिक्षचरःश्रीमान्वायुभूतःसुनिश्चितः १०
तमुद्यंतंद्विजश्रेष्ठंवैनतेयसमद्युतिं ददृशुःसर्वभूतानिमनोमारुतरंहसं ११ व्यवसायेनलोकांस्त्रीन्सर्वान्सोथविचिंतयन् आस्थि
तोदीर्घमध्वानंपावकार्कसमप्रभः १२ तमेकमनसंयांतमव्यग्रमकुतोभयं ददृशुःसर्वभूतानिजंगमानिचराणिच १३ य
थाशक्तियथान्यायंपूजांचैवचक्रिरेतदा पुष्पवर्षैश्चदिव्यैस्तमवचक्रुर्दिवौकसः १४ तंदृष्ट्वाविस्मिताःसर्वेगंधर्वाप्सरसांगणाः
ऋषयश्चैवसंसिद्धाःपरंविस्मयमागताः १५ अंतरिक्षगतःकोयंतपसासिद्धिमागतः अधःकायोर्ध्ववक्त्रश्चनेत्रैःसमा
भिरज्यते १६ ततःपरमधर्मात्मात्रिषुलोकेषुविश्रुतः भास्करंसमुदीक्षन्सप्राङ्मुखोवाग्यतोगमत् १७ ॥ ॥ ॥

शब्देनाकाशमखिलंपूरयन्निवसर्वशः तमापतंतंसहसादृष्ट्वासर्वाप्सरोगणाः १८ संभ्रांतमनसोराजन्नासन्परमविस्मिताः पंचचूडाप्रभृ
तयोभृशमुत्फुल्ललोचनाः १९ दैवतंकतमंह्येतदुत्तमांगतिमास्थितं सुनिश्चितमिहायातिविमुक्तमिवनिस्पृहं २० ततःसमभिचक्राम म
लयंनामपर्वतं उर्वशीपूर्वचित्तिश्चयंनित्यमुपसेवतः २१ तस्यब्रह्मर्षिपुत्रस्यविस्मयंययतुःपरं अहोबुद्धिसमाधानंवेदाभ्यासरतेद्विजे
२२ अचिरेणैवकालेननभश्चरतिचंद्रवत् पितृशुश्रूषयाबुद्धिंसंप्राप्तोयमनुत्तमां २३ पितृभक्तोदृढतपाः पितुःसुदयितःसुतः अन
न्यमनसातेनकथंपित्राविसर्जितः २४ उर्वश्याचवचःश्रुत्वाशुकःपरमधर्मवित् उदैक्षतदिशःसर्वावचनेगतमानसः २५ सोंतरिक्षंम
हींचैवसशैलवनकाननां विलोकयामासतदासरांसिसरितस्तथा २६ ततोद्वैपायनसुतंबहुमानात्समंततः कृतांजलिपुटाःसर्वानि
रीक्षंतेस्मदेवताः २७ अब्रवीत्तास्तदावाक्यंशुकःपरमधर्मवित् पितायद्यनुगच्छेन्मांक्रोशमानःशुकेतिवै २८ ततःप्रतिवचोदेयंस
र्वैरेवसमाहितैः एतन्मेस्नेहतःसर्वैर्वचनंकर्तुमर्हथ २९ शुकस्यवचनंश्रुत्वादिशःसर्वाःसकाननाः समुद्राःसरितःशैलाःप्रत्यूचु
स्तंसमंततः ३० ॥ ॥

३१ अध्यायः इत्येवमिति दोषाननु सात्त्विकान् मोक्षप्रतिबंधकान् मोक्षप्रतिबंधकान् धर्मज्ञानवैराग्यैश्वर्यं महतां एतैः किल्बिषसंसर्गो नैश्वर्याख्यान् यदाहमनुः
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान् ध्यानेनानैश्वरान् गुणानिति वा योगानिति पाठे वितर्कविचारानंदास्मिताख्यान् संप्रज्ञा
तभेदान् तत्फलानीत्यर्थः १ अष्टविधं पुर्यष्टकप्रकारं तमः पंचविधं विषयपंचकं प्रवर्तकं वासनामयं रजः नवगुणं रजइति पाठे त्रसागित्वमकार्येषुसुखदुः

यथाज्ञापयसे विप्र बाढमेवं भविष्यति अश्मेवाहरतो वाक्यं प्रतिवक्ष्यामहे वयं २१ शांतौ मोक्षधर्मे शुकाभिपतने
भीष्मउवाच इत्येवमुक्त्वा वचनं ब्रह्मर्षिः सुमहातपाः प्रातिष्ठत शुकः सिद्धिं हित्वा दोषांश्चतुर्विधान् १ तमोऽप्यष्टविधं हि
त्वा जहौ पंचविधं रजः ततः सत्त्वं जहौ धीमांस्तदद्भुतमिवाभवत् १ ततस्तस्मिन्पदे नित्ये निर्गुणे लिंगवर्जिते ब्रह्मणि प्र
त्यतिष्ठत्स विधूमोऽग्निरिव ज्वलन् ३ उल्कापाता दिशां दाहा भूमिकंपास्तथैव च प्रादुर्भूताः क्षणे तस्मिंस्तदद्भुतमिवाभ
वत् ४ द्रुमाः शाखाश्च मुमुचुः शिखराणि च पर्वताः निर्घातशब्दैश्च गिरिर्हिमवान्दीर्यतीव ह ५ ॥ ॥ ॥ ॥ ॥

खोपसेवनं मेदः परुषत्वं चैव कामः क्रोधः स्थैर्यं च वा ईर्ष्या द्वेषोऽतिवादश्चेत्येते प्रोक्ता रजोगुणा इति प्रोक्ता ज्ञेयाः सत्त्वबुद्धिं तेनेन सर्वं संत्यज्य सत्त्वमपि त्यक्तं येन
समसितसंजेत्तिना इदं नोपदिष्टत्वात् २ तस्मिन् ब्रह्मादिस्थानयोनिविशिष्टपरब्रह्मणि नित्ये पुनरावृत्तिवर्जिते यत्ना निर्गुणे प्रत्यतिष्ठत ३ महापुरुषस्य
परमेष्ठि जगद्भाग्यसूचकाः उत्पाता भवंतीत्याह उल्कापाता इति ४ ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

६ ववौ सर्वार्त्यः शुकस्यात्मनेश्रकुनानि ९ द्विधाकृते मारेणा समुत्संघेनेहनुमत्र्यीरेणमेदं द्व्यर्धेतरु वचथामायेत्यर्थः १५ ततइति शैवोत्कासुसप्तसुवा

नैवमासेसहलांशुर्नेजह्वालनचपावकः कूदाश्चसरितश्चैववबुक्षुभुः सागरास्तथा ६ ववर्षेवासवस्तोयंरसवच्चसुगंधि
च ववौसमीरणश्चापिदिव्यगंधवहः शुचिः सश्रृंगेप्रथमेदिव्येहिमवन्मेरुसंभवे संश्लिष्टेश्वेतपीतेद्वेरुक्मरूप्यमये
शुभे ८ शतयोजनविस्तारेतिर्यगूर्ध्वंचभारत उदीचींदिशमास्थायरुचिरेसंददर्शह ९ सोविशंकेनमनसातथैवा
भ्यपतच्छुकः ततः पर्वतशृंगेद्वेसहसैवद्विधाकृते १० अदृश्येतांमहाराजतदद्भुतमिवाभवत ततः पर्वतशृंगाभ्यांसह
सैवविनिःसृतः ११ नचप्रतिजघानास्यसगतिंपर्वतोत्तमः ततोमहानभूच्छब्दोदिविसर्वदिवौकसां १२ गंधर्वाणा
मृषीणांचयेचशैलनिवासिनः दृष्ट्वाशुकमतिक्रांतंपर्वतंतद्विधाकृतं १३ साधुसाध्वितितत्रासीन्नादःसर्वत्रभा
रत सपूज्यमानोदेवैश्चगंधर्वैर्ऋषिभिस्तथा १४ यक्षराक्षससंघैश्चविद्याधरगणैस्तथा दिव्यैःपुष्पैःसमा
कीर्णमंतरिक्षंसमंततः १५ आसीत्किलमहाराजशुकाभिपतनेतदा ततोमंदाकिनींरम्यामुपरिष्टादभिव्रजन १६
शुकोददर्शधर्मात्मापुष्पितद्रुमकाननां तस्यांक्रीडंत्यभिरतास्नांतिचैवाप्सरोगणाः १७ शून्याकारंनिराकाराःशु
कंदृष्ट्वाविवाससः तंप्रक्रामंतमाज्ञायपितास्नेहसमन्वितः १८ ॥ ॥

विद्यासुपंचम्याः ज्ञानकर्मसमुच्चयरूपायाः पार्यंतिकंफलंपंचमवायुस्थानस्यमंदाकिनीदिशस्यप्राप्तिः १६ १७ ॥ ॥

शुकस्तुमिमाहात्मतस्त्वात्मनऊर्ध्वंगायुर्वैगौतमततस्त्वमिमिनिष्क्रांतेः १९ व्यासः उत्तापसंघिरार्घः २१ शुकेतिशुकाइतिदूराद्दूतेश्रुतिः स्वस्तुतत्तुपस्थित

उत्तमांगतिमास्थायपृष्ठतोनुससारह शुकस्तुमारुतादूर्ध्वंगतिंकृत्वांतरिक्षगां १९ दर्शयित्वाप्रभावंस्वंब्रह्मभूतोभवत्तदा म
हायोगगतिंत्वग्र्यांव्यासोथमहातपाः २० निमेषांतरमात्रेणशुकाभिपतनंययौ सददर्शद्विधाकृत्वापर्वताग्रंशुकंगतं २१
शशंसुर्ऋषयस्तस्मैकर्मपुत्रस्यतत्तदा ततःशुकेतिदीर्घेणशैलेनाक्रंदितस्तदा २२ स्वयंपित्रास्वरेणोच्चैस्त्रींल्लोकाननुनाद्य
वै शुकःसर्वगतोभूत्वासर्वात्मासर्वतोमुखः २३ प्रत्यभाषतधर्मात्माभोःशब्देनानुनादयन् ततएकाक्षरंनादंभोइत्येवमु
दीरयन् २४ प्रत्याहरज्जगत्सर्वमुच्चैःस्थावरजंगमं ततःप्रभृतिचाद्यापिशब्दानुच्चारितान्पृथक् २५ गिरिगह्वरपृष्ठेषु
व्याहरंतिशुकंप्रति अंतर्हितःप्रभावंतुदर्शयित्वाशुकस्तदा २६ गुणान्संत्यज्यशब्दादीन्पदमभ्यगमत्परं महिमानंतुतंदृष्ट्वा
पुत्रस्यामिततेजसः २७ निषसादगिरिप्रस्थेपुत्रमेवान्वचिंतयन् ततोमंदाकिनीतीरेक्रीडंतोप्सरसांगणाः २८ आ
साद्यतमृषिंसर्वाःसंभ्रांतागतचेतसः जलेनिलिल्यिरेकाश्चित्काश्चिद्गुल्मान्प्रपेदिरे २९ वसनान्याददुःकाश्चित्तंदृ
ष्ट्वामुनिसत्तमं तांमुक्ततांतुविज्ञायमुनिःपुत्रस्यवैतदा ३० सक्ततामात्मनश्चैवप्रीतोभूद्व्रीडितश्चह ॥ ॥ ॥

इतिस्वस्तुतयस्मावान्नप्रकृतिभावः २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ॥ ॥

तमुवाचमहादेवइत्यादिनाछायायाःशुकसदृशत्वंव्यासादीनामपिपुत्रशोकोऽसंतापरिहार्यइतिसूचनेनशुकवद्देवनैष्ठिकंब्रह्मचर्यमातिष्ठेदित्यादिशयोदर्शितः ३१ ४२

तंदेवगंधर्ववृतोमहर्षिगणपूजितः पिनाकहस्तोभगवानभ्यागच्छतशंकरः ३२ तमुवाचमहादेवःसांत्वपूर्वमिदंवचः पुत्रशोकाभिसंतप्तंकृष्णद्वैपायनंतदा ३३ अग्नेर्भूमेरपांवायोरंतरिक्षस्यचैवह वीर्येणसदृशःपुत्रःपुरामत्तस्त्वयावृतः ३४ सतथालक्षणोजातस्तपसातवसंभृतः ममचैवप्रसादेनब्रह्मतेजोमयःशुचिः ३५ सगतिंपरमांप्राप्तोदुःप्रापामजितेंद्रियैः दैवतैरपिविप्रर्षेतंत्वंकिमनुशोचसि ३६ यावत्स्थास्यंतिगिरयोयावत्स्थास्यंतिसागराः तावत्तवाक्षयाकीर्तिःसपुत्रस्यभविष्यति ३७ छायांस्वपुत्रसदृशींसर्वतोनपगांसदा द्रक्ष्यसेत्वंचलोकेस्मिन्मत्प्रसादान्महामुने ३८ सोनुनीतोभगवतास्वयंरुद्रेणभारत छायांपश्यन्समावृत्तःसमुनिःपरयामुदा ३९ इतिजन्मगतिश्चैवशुकस्यभरतर्षभ विस्तरेणसमाख्यातंयन्मांत्वंपरिपृच्छसि ४० एतदाचष्टमेराजन्देवर्षिर्नारदःपुरा व्यासश्चैवमहायोगीसंजल्पेषुपदेपदे ४१ इतिहासमिमंपुण्यंमोक्षधर्मोपसंहितं धारयेद्यःशमपरःसगच्छेत्परमांगतिं ४२ शांतौमोक्षधर्मेषुशुका
पतनंसमाप्तं ॥

इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभारतभावदीपेशांतौमोक्षधर्मेषुसप्तपंचाशदधिकशततमोध्यायः ॥ ॥ ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति श्रुतेर्भक्त्या मामभिजानातीति भगवद्वचनाच्च भक्तेर्ज्ञानांगत्वं बुद्ध्वा भजनी
यां देवतां पृच्छति गृहस्थ इति १ कुतः कस्य प्रसादात् ध्रुवः अनावृत्तिफलको ब्रह्मलोकः ३ तस्माद्देवादीनां जनकात् ४ तर्कया तर्केण। आर्षेण लिंग
असयः ५ ज्ञानागमेन नाशेन विना ७ चतस्रो मूर्तयः नराद्याः स्वयंभुवः स्वेनैव वासुदेवस्यैवैते चत्वारो व्यूहाः अजन्मानः तेन तुर्यो वरात्राणामिव वा

युधिष्ठिर उवाच गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः यश्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः १ कुतो ह्यस्य ध्रुवः स्वर्गः कुतो नैःश्रेयसं परं विधिना केन जुहुयाद्दैवं पित्र्यं तथैव च २ मुक्तश्च कां गतिं गच्छेन्मोक्षश्चैव किमात्मकः स्वर्गतश्चैव किं कुर्याद्येन न च्यवते दिवः ३ देवतानां च को देवः पितॄणां च पिता तथा तस्मात्परतरं यच्च तन्मे ब्रूहि पितामह ४ भीष्म उवाच गूढं मां प्रश्नवित्प्रश्नं पृच्छसे त्वमिहानघ न ह्येष तर्कया शक्यो वक्तुं वर्षशतैरपि ५ ऋते देवप्रसादाद्वा राजन् ज्ञानागमेन वा गहनं ह्येतदाख्यानं व्याख्यातव्यं तवारिहन् ६ अत्राप्युदाहरन्तीममितिहासं पुरातनं नारदस्य च संवादमृषेर्नारायणस्य च ७ नारायणो हि विश्वात्मा चतुर्मूर्तिः सनातनः धर्मात्मजः संबभूव पितैवं मेऽभ्यभाषत ८ ॥ ॥ ॥ ॥

सुदेवात्परमकारणात् संकर्षणाख्यो जीव उत्पद्यते ततः प्रद्युम्नाख्यं मनो जायते ततो ऽनिरुद्धाख्यो ऽहंकार उत्पद्यत इति मतं निरस्तं। तथा च सूत्रं उत्पत्त्यसंभ
वादिति न च कर्तुः करणमिति च। जीवस्यास्य नित्यत्वे विनाशित्वस्यापत्तेः तथा च मोक्षिणां भावः कर्तुः सकाशात्करणोत्पत्तिर्दृष्टा लोक इति सूत्रार्थः॥

मो०
५०४

504

शकटे शकटवत्सर्वप्रेर्ये शरीरे। कनकवत्तेजोमयत्वात्कनकामयं यत्तन्मयं पीस्थित्वेति शेषः अष्टौ प्रकृतयश्चक्रवत्वाहकानि यस्मात्तेन भूतैः पंचभिर्युक्तं हिरण्यहिताल्लोकप्रसि
द्धमिदं नरनारायणयोः शरीरे तु मायामये इत्यर्थः वक्ष्यति च मायाह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसीति ११ तत्र

कृते युगे महाराज पुरा स्वायंभुवेंतरे। नरो नारायणश्चैव हरिः कृष्णः स्वयंभुवः तेषु नारायणो नरो तपस्तेपतुरव्ययौ बदर्याश्रम
मासाद्य शकटे कनकामये अष्टचक्रं हि तद्यानं भूतयुक्तं मनोरमं ९ तत्राद्यौ लोकनाथौ तौ कृशौ धमनिसंततौ तपसा तेजसा चै
व दुर्निरीक्ष्यौ सुरैरपि १० यस्य प्रसादं कुर्वाते स देवौ द्रष्टुमर्हति नूनं तयोरनुमते हृदि हृच्छयचोदितः ११ महामेरोर्गिरेः शृंगा
त्प्रच्युतो गंधमादने नारदः सुमहद्भूतं सर्वलोकानचीचरत् १२ तं देशमगमद्राजन्बदर्याश्रममाशुगः तयोराह्निकवेलायां
तस्य कौतूहलं त्वभूत् १३ इदं तदास्पदं कृत्स्नं यस्मिन्लोकाः प्रतिष्ठिताः सदेवासुरगंधर्वाः सकिंनरमहोरगाः १४ एकामू
र्तिरियं पूर्वं जाता भूयश्चतुर्विधा धर्मस्य कुलसंताने धर्मादेभिर्विवर्द्धिता १५ अहो ह्यनुगृहीतोद्य धर्म एभिः सुरैरिह नरनारा
यणाभ्यां च कृष्णेन हरिणा तथा १६ अत्र कृष्णो हरिश्चैव कस्मिंश्चित्कारणांतरे स्थितौ धर्मोत्तरौ ह्येतौ तथा तपसि धिष्ठि
तौ १७ एतौ हि परमं धाम कानयोराह्निकक्रिया पितरौ सर्वभूतानां दैवतं च यशस्विनौ १८ कां देवतां तु यजतः पि
तॄन्वा कान्महामती इति संचिंत्य मनसा भक्त्या नारायणस्य तु १९ ॥ ॥ ॥ ॥ ॥

नमिति। हृच्छयो ऽनर्पामीतेन प्रेरितः ११ आह्निकं ब्रह्मयज्ञादि आस्पदं आधिष्ठानं १५ १६ १७ १८ १९ ॥ ॥

एम०
५०४

२७ अवाच्यमपिभक्तिमत्वाद्वक्ष्यामीत्यर्थः २८ सूक्ष्मंदुर्लक्ष्यंयतः अविज्ञेयंदृष्टादियत्रअन्नस्यैव अव्यक्तं नास्तिअक्तंकार्यंयस्यकारणमपिनेत्यर्थः

सहसाप्रादुरभवत्समीपेदेवयोस्तदा कृतेदैवेचपित्र्येचततस्ताभ्यांनिरीक्षितः २० पूजितस्चैवविधिनायथाप्रोक्तेनशा
स्त्रतः तंदृष्ट्वामहदाश्चर्यमपूर्वंविधिविस्तरं २१ उपोपविष्टःसुप्रीतोनारदोभगवानृषिः नारायणंसंनिरीक्ष्यप्रसन्नेनान्त
रात्मना नमस्कृत्वामहादेवमिदंवचनमब्रवीत् २३ नारदउवाच वेदेषुसपुराणेषुसांगोपांगेषुगीयसे त्वमजः शाश्व
तोधाताऽमृतोमृतमनुत्तमं २४ प्रतिष्ठितंभूतभव्यंत्वयिसर्वमिदंजगत् २५ चत्वारोह्याश्रमादेवसर्वेगार्हस्थ्यमूलकाः
यजंतेत्वामहरहोनानामूर्त्तिसमास्थितं २६ पितामाताचसर्वस्यजगतः शाश्वतोगुरुः कंत्वद्ययजसेदेवंपितरंकंन
विद्महे २७ श्रीभगवानुवाच अवाच्यमेतद्वक्तव्यमात्मगुह्यंसनातनं तवभक्तिमतोब्रह्मन्वक्ष्यामितुयथातथं
२८ यत्तत्सूक्ष्ममविज्ञेयमव्यक्तमचलंध्रुवं इंद्रियैरिंद्रियार्थैश्चसर्वभूतैश्चवर्जितं २९ सह्यंतरात्माभूतानांक्षे
त्रज्ञश्चेतिकथ्यते त्रिगुणव्यतिरिक्तोसौपुरुषश्चेतिकल्पितः ३० ॥ ॥ ॥

यतः अचलंकूटस्थंअविकारिणएवकारणत्वनियमात् ध्रुवंशाश्वतंनसद्ग्राह्यमित्यर्थः एतेनतदसत्वशंकानिरस्ता २९ पुरिशरीरेवसतीतियो
गात्पुरुषइतिकल्पितः नतुतस्यदेहेसंगित्वात्संसारित्वमस्तीत्यर्थः ३० ॥ ॥

मो०
५०५

505

अव्यक्तं सांख्यैर्निरसेन कल्पितं प्रधानं ननु पुरुषस्य व्यक्तजनकत्वेऽकोरस्य माहतिरेतन्माह व्यक्तेति यासन्नासंयं व्यक्ता। घटादिर्मोनिकृष्टापादा न
स्याः अग्रहणात् व्यक्तेषु च मां विमुग्धः स्यन्न निमित्त सदृयेराग्निशक्तिसेवसन्नाव्यया अपरिणामिनी प्रकृतिरुपादानं। रज्जूरगवद्दृश्यपञ्चानां विवर्तेऽर
सम्भुपगमान्नप्रसराः कोरस्य हानिरित्यर्थः कल्पितस्य कार्यस्य कारणं कार्यसजातीयं कल्पितमेव भवति तत्त्वं च कल्पनासमानकालि[illegible] कमेवान[illegible]
रज्जूरगस्य सत्वरूपेणाभानात्मपत्तीत्यत्र किं चिन्मानमलिनचवाधकाभावात् कार्यस्य कल्पितत्वमेवासिद्धमिति वाच्यं। यद्यत्र नास्तिकरूपावरणाद्भेदकम
भेदेन भाति तत्तत्र कल्पितमिति नियमेनाहंकारादेर्मिथ्यात्वावगमात् भाति च चिदात्मनः स्वरूपमाहस्ततद्भेदेन प्रसयात्माः यमहं सुखी दुःखी

तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम अव्यक्ताव्यक्तभावस्था या सा प्रकृतिरव्यया ३०

व्यासेलोगोरः कारणमिति सुवर्णं कुण्डलस्याप्यत्तलंमाभूदिति तालिके कति ननु अहंकारधर्मो दुःखादयस्तिदात्मनि चिदात्मधर्माश्चेतन्मा[illegible]
योऽहंकारे चाध्यस्त्वं तं किं धर्म्याध्यासकल्पने नेति चेत् न यत्रादृधर्ममात्रमध्यस्तं तत्र तत्र धर्मिणः उत्तरस्वरूपतेयथा लोहितः स्फटिक इति लोहि
तगात्रमुल्लिख्यते न जपाकुसुममपि। अहंकाराध्यासे तु अहं दुःखी निधर्म्युल्लेखपूर्वकं धर्माध्यासः प्रतीयमानस्तत्र धर्मिणोऽप्यध्यस्तत्वं विस्पष्ट
मार्चिषः। तस्माद्ध्यस्तत्वेनाहमादेर्मिथ्यात्वात्तत्कारणस्याव्यक्तस्यापि तथात्वेन दृष्टिसमसमयकल्पितत्वस्यावश्यं वक्तव्यत्वात्तस्माद्व्यक्तमुत्पन्नमिसव
त्रोत्पत्तिवचनं संगच्छते न तत्त्वमिति दिक्। ३० ॥ ॥

ए.म०
५०५

अस्याध्यस्तस्याव्यक्तस्य जीवेशविभागे दृष्टान्तमाह तां योनिमिति विषयोपक्षं स्वीयं तां निष्कलेचेतनस्वरूपां मायया आविर्भवति जीवेश्वरयोः प्रकृतिर्विद्दितथाचश्रुतिः
जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीतिश्रुतिः यो सौ निष्कलः सदसदात्मकः सदसती कार्य कारणे तत्कल्पना श्रानेनात्मकः

तां योनिमाव्ययोर्विद्धि यो सौ सदसदात्मकः अवाभ्यां भुज्यते सो हि दैवे पित्र्ये च कल्प्यते ३१ नास्ति तस्मात्परो भोक्ता हि पिता देवोथवा
द्विजश्चात्माहितः सर्वज्ञेयस्तत्तत्त्वं पूजयावहे ३२ तेनैवाप्रथितात्मस्य नन्याला लोकभाविनी दैवे पित्र्ये च कर्तव्यमिति
स्यानुशासनं ३३ ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथा यमः मरीचिरंगिरा त्रिश्च पुलस्त्यः पुलहः क्रतुः ३४ वसिष्ठः परमे
ष्ठी च विवस्वान्सोम एव च कर्दमश्चापि यः प्रोक्तः क्रोधो विक्रीत एव च ३५ एकविंशतिरुत्पन्नास्ते प्रजापतयः स्मृताः तस्य
देवस्य मर्यादां पूजयंतः सनातनीं ३६ दैवे पित्र्ये च सततं तस्य विज्ञाय तत्त्वतः आत्मप्राप्तानि च ततः प्राप्नुवंति द्विजोत्तमा
: ३७ स्वर्गस्था अपि ये के चित्तान्नमस्यंति देहिनः ते तत्प्रसादात्गच्छंति तेनादिष्टफलां गतिम् ३८ ये हीनाः सप्तदशभिर्गुणैः
कर्मभिरेव च कलाः पंचदश त्यक्त्वा ते मुक्ता इति निश्चयः ३९ ॥ ॥ ॥ ॥ ॥ ॥

स एव पूज्यते आनंदात्मा सर्वैरित्यर्थः ३४ तेनमायोपाधिना ३८ सप्तदशभिः पंचप्राणा मनो बुद्धिर्दशेंद्रियैः गुणैः सत्वादिभिः कर्मभिः शुक्लकृष्णैः ये पंचदश
चंद्रकलौघ राजीयाः सक्ताः पूर्वोक्तं लिंगमंग उक्तः उत्तरदेहं स्थूलमंग उक्तः उभयोरप्येकोनविंशतिमुखत्वसमां दुर्केत्मुखवद्धावरणान तामेवैकोन
विंशतिं रत्नभावेन सप्तदश पंचदश च भवंति ३९

क्षेत्रज्ञःशिवदात्मासर्वगुणात्मंमाययानिर्गुणात्मस्वतः ४० प्रसृतौनिर्गतौ ४४ अस्मिन्नेवाध्यायेसर्वेप्रश्नाःसमाहिताःज्ञेयाः ४४ शांतौ॰ इ॰ पंचाद्दशाधिक॰

मुक्तानांतुगतिर्ब्रह्मन्क्षेत्रज्ञइति कल्पिता सहिसर्वगुणश्चैवनिर्गुणश्चैवकथ्यते ५० दृश्यतेज्ञानयोगेनआवांचप्रसृतौत
तः एवंज्ञात्वातमात्मानंपूजयावःसनातनं ५१ तंवेदाश्चाश्रमाश्चैवनानामतसमास्थिताः भक्त्यासंपूजयंत्यास्यगतिं
चैषांददातिसः ५२ येतुतद्भाविता लोकेह्येकांतित्वंसमास्थिताः एतदभ्यधिकंतेषांयत्तेतंप्रविशंत्युत ५३ इतिगुह्यस
मुद्देशस्तवनारदकीर्तितः भक्त्याप्रेम्णाचविप्रर्षेअस्मद्भक्त्याचतेश्रुतः ५४ शांतौमोक्षधर्मेषुनारायणीये भीष्मउवा
च सप्रवृत्तोद्विपदांवरिष्ठोनारायणोनत्ममहर्षिणा जगादवाक्यंद्विपदांवरिष्ठंनारायणोलोकहिताधिवासं १ नार
दउवाच यदर्थमात्मप्रभवेनजन्मकृतंत्वयाधर्मगृहेचतुर्धा तत्साध्यतांलोकहितार्थमद्यगच्छामिद्रष्टुंप्रकृतिंतवाद्यां
२ पूजागुरूणांसततंकृतामेपरस्यगुह्यंनचभिन्नपूर्वं वेदाःस्वधीताममलोकनाथतप्तंतपोनानृतमुक्तपूर्वं ३ गुप्ता
निचत्वारियथागमंमेशत्रौचमित्रेचसमोस्मिनित्यं तंचादिदेवंसततंप्रपन्नएकांतभावेनवृणोम्यजस्रं ४ ॥ ॥

धपातत्तमोध्यायःसरव १ आत्मप्रभवेनस्वयंभुवाजन्मअवतारः आद्यांप्रकृतिंश्वेतद्वीपस्थां २ तद्दर्शनेस्वस्याधिकारसंपत्तिमाहपूजामिति ३ चत्वारिपाणि
पादोदरोपस्थानि ४ ॥ ॥

७ उत्तरपश्चिमेनवायव्यकोणेन: योत्तरतः यः उत्तरतः ८ मेरुमूलात्द्वात्रिंशत्सहस्रयोजनादूर्ध्वो अनिंद्रियाः स्थूलदेहसंगहीनाः अन्न एव अनशनाः श
ब्दादिविषयभोगशून्याः निष्पंदहीनाः निश्चेष्टाश्च। [illegible] परमात्मासु-गंधिपुष्पवर्द्धनमितिमंत्रलिंगात् शोभनः सुभगंधिः सुगंधिः

एभिर्विशेषैः परिशुद्धसत्वः कस्मान्नपश्येयमनंतमीशं तत्वारंभेस्यस्य वचोनिशम्य नारायणः शाश्वतधर्मगोप्ता ५ गच्छेतितं
नारदमुक्तवान्सः संपूजयित्वात्मविधिक्रियाभिः ततोविसृष्टः परमेष्ठिपुत्रः सोभ्यर्चयित्वातमृषिंपुराणं ६ खमुत्पपातोत्तमयो
गयुक्तस्ततोधिमेरौसहसानिलिल्ये तत्रावतस्थेचमुनिर्मुहूर्तमेकांतमासाद्यगिरेः सशृंगे ७ आलोकयन्नुत्तरपश्चिमेनददर्शचा
प्यद्भुतमुक्तरूपं क्षीरोदधेरुत्तरतोहिद्वीपः श्वेतः सनाम्नाप्रथितोविशालः ८ मेरोः सहस्रैः सहियोजनानांद्वात्रिंशतोर्ध्वंक
विभिर्निरुक्तः अतींद्रियाश्चानशनाश्चतत्रनिस्पंदहीनाः ससुगंधिनस्ते ९ श्वेताः पुमांसोगतसर्वपापाश्चक्षुर्मुषः पा
पकृतांनराणां १० वज्रास्थिकायाः सममानोन्मानादिव्यावयवरूपाः शुभसारोपेताः १० ॥ ॥

सोत्पंनांध्यानगोचरेइतिसुगंधिनः ९ श्वेताः शुद्धसत्वप्रधानाः चक्षुर्मुषः तेजस्वित्वात् । मानश्चउन्मानोपमानश्चसमेमेषांते । शुभः योगप्रभावजः सारो
बलंतेनउपेताः १०

छत्राकृतिशीर्षाः निर्मांसग्रीवत्वात् समपीनलरहितमुष्काद्वृषणौ वृतुष्कं ऋस्य येषां ते कधोग्रवांतरालस्वमुष्कचतुष्कं वा किंमुत्तावान्मुष्कयो वेदव्यासत इति
लिंगान्मुष्कोवाङ्कः मुष्ककाश्वतुल्ययेषां। समुष्कचतुष्काश्मपि पठंति एजीवत्तः पंक्तियुक्ताः शिरोरेखाः तासां येते युक्ताः पादा येषां। नाडीशतपादाः ऽ
तिपादांतरं अष्टाभ्यां अष्टिसंख्यैः दंतैः शिवजगच्चरणकचंगाश्रमैः संवत्सरेर्युक्ताः अष्टौदिशः सवेषांत्राम्यमूलाः नाभिश्च युक्ताः देशकालौ येषां मुख
मध्यप्रविष्टाविसर्थः स्येयणामस्योयत्तसकृटीक्रियंते रिनमो सच्चिसंवत्सरात्मा महाकालस्तं विश्ववक्त्रं विश्वंवक्त्रेयस्य सत्तादशं जिह्वाभिरिव सांगभूता

छत्राकृतिशीर्षाभिमेघौघनिनादाः सममुष्कचतुष्का राजीवशतपादाः षष्ट्या दंतैर्युक्ताः शुक्लैरष्टाभिर्दंष्ट्राभिर्ये जिह्वाभि
र्ये विश्ववक्त्रं लेलिह्यंते सूर्यप्रख्यं ११ भक्त्या देवं विश्वोत्पन्नं यस्मात्सर्वे लोकाः संप्रसूताः वेदा धर्मा मुनयः शांता दे
वाः सर्वे तस्य निसर्गः १२ युधिष्ठिर उवाच अतींद्रिया निराहारा अनिस्पंदाः सुगंधिनः कथं ते पुरुषा जाताः का ते
षां गतिरुत्तमा १३ ये च मुक्ता भवंतीह नरा भरतसत्तम तेषां लक्षणमेतद्धि श्वेतद्वीपवासिनां १४ ॥ ॥ ॥

नि१

भिः रसनाग्रशक्तिभिर्लेलिह्यंते पायसमिव लिहंति। कुतएते षामीदृशं कालग्रसनसामर्थ्यमत आह देवं भिमित्ति यस्मात् हेतोः देवं परमेश्वरं संप्रसूताः ध्या
नवलेन तद्दियव्यक्तीकृतं वंत सः ससागारेमातापुत्रमिवातमेवदेवं विशिनष्टि। विश्वोत्पन्नं विश्वमुत्पन्नं यस्मात्। वेदादयः तस्य निसर्गः अपत्यरचित्तः ११
श्वेतद्वीपनिवासिनां जीवन्मुक्तानां च निरिंद्रियत्वादिकं एकमेव लक्षणं कथं। मूर्त्ते ब्रह्मध्यायिनाम मूर्त्तानां अमूर्त्ते वेद्ये ध्यायिनां च योगिनां तुल्यत्वं कथ
मितिभावः १३ १४

२१ सात्वतंसात्वतानांपांचरात्राणांहितं। तच्छेषेणविशुद्धेषेण २२ प्रायणांऽपहारं २३ २४ २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्मान्मेसंशयंछिंधिपरंकौतूहलंहिमे त्वंहिसर्वकथारामस्त्वांचैवाश्रितावयं १४ भीष्मउवाच विस्तीर्णैषाकथाराजन्श्रु
तामेपितृसन्निधौ येषातवहिवक्तव्याकथासारोहिसामता १५ राजोपरिचरोनामबभूवाधिपतिर्भुवः आखंडलसखः ख्यातो
भक्तोनारायणंहरिं १६ धार्मिकोनित्यभक्तश्चपितुर्नित्यमतंद्रितः साम्राज्यंतेनसंप्राप्तंनारायणवरात्पुरा १६ सात्वतंवि
धिमास्थायप्राक्सूर्यमुखनिःसृतं पूजयामासदेवेशंतच्छेषेणपितामहान् १७ पितृशेषेणविप्रांश्चसंविभज्याश्रितांश्चसः
शेषान्नभुक्सत्यपरः सर्वभूतेष्वहिंसकः १८ सर्वभावेनभक्तःसदेवदेवंजनार्दनं अनादिमध्यनिधनंलोककर्त्तारमव्य
यं १९ तस्यनारायणेभक्तिंवहतोमित्रकर्षिणः एकशय्यासनंदेवोदत्तवान्देवराट्स्वयं २० आत्माराज्यंधनंचैवं
कलत्रंवाहनंतथा यत्तद्भागवतंसर्वमितितत्प्रेक्षितंसदा २१ काम्यनैमित्तिकाराजन्यज्ञियाः परमक्रियाः सर्वाःसात्व
तमास्थायविधिंचक्रेसमाहितः २२ पंचरात्रविदोमुख्यास्तस्यगेहेमहात्मनः प्रायणंभगवत्प्रोक्तंभुंजतेवाग्रभोजनं
२३ तस्यप्रशासतोराज्यंधर्मेणामित्रघातिनः नानृतावाक्समभवन्मनोदुष्टंनचाभवत् २४ नचकायेनकृतवान्स
पापंपरमण्वपि येहितेऋषयःख्याताःसप्तचित्रशिखंडिनः २५

सप्तप्रकृतयोमहदहंकारश्चमूर्त्तयः स्वायंभुवस्तत्त्वमूलप्रकृतिरेवामहत्कान्येकत्वादिदंशास्त्र मुपादेयमितिपांचरात्रागमस्यैतेस्तु तिरध्यायशेषेणासमर्थ्य

तैरेकमतिभिर्भूत्वायत्प्रोक्तंशास्त्रमुत्तमं वेदैश्चतुर्भिःसमितंकृतंमेरौमहागिरौ २६ आस्यैःसप्तभिरुद्गीर्णंलोकधर्ममनु
त्तमं मरीचिरत्र्यंगिरसौपुलस्त्यः पुलहः क्रतुः २७ वसिष्ठश्चमहातेजास्तेहिचित्रशिखंडिनः सप्तप्रकृतयोह्येतास्तथास्वा
यंभुवोऽष्टमः एताभिर्धार्यतेलोकस्ताभ्यः शास्त्रंविनिःसृतं २८ एकाग्रमनसोदांतामुनयः संयमेरताः भूतभव्यभविष्य
ज्ञाः सत्यधर्मपरायणाः २९ इदंश्रेयइदंब्रह्मइदंहितमनुत्तमं लोकान्संचिंत्यमनसाततः शास्त्रंप्रचक्रिरे २९ तत्रध
र्मार्थकामाहिमोक्षः पश्चाच्चकीर्त्तितः मर्यादाविविधाश्चैवदिविभूमौचसंस्थिताः ३० आराध्यतपसादेवंहरिंनाराय
णंप्रभुं दिव्यंवर्षसहस्रंवैसर्वेतेऋषिभिस्सह ३१ नारायणानुशास्ताहितदादेवीसरस्वती विवेशतान्ऋषीन्सर्वांल्लोकानां
हितकाम्यया ३२ ततःप्रवर्त्तितासम्यक्तपोविद्भिर्द्विजातिभिः शब्देचार्थेचहेतौचएषाप्रथमसर्गजा ३३ आदावेवहि
तच्छास्त्रमोंकारस्वरभूषितं ऋषिभिःश्रावितंतत्रयत्रकारुणिकोह्यसौ ३४ ततःप्रसन्नोभगवाननिर्दिष्टशरीरगः ऋ
षीनुवाचतान्सर्वानदृश्यः पुरुषोत्तमः ३५ कृतंशतसहस्रंहिश्लोकानामिदमुत्तमं लोकतंत्रस्यकृत्स्नस्ययस्माद्धर्मः

आध्यायः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रवृत्तौचनिवृत्तौचयस्मादेतद्भविष्यति यजुर्ऋक्सामभिर्जुष्टमथर्वांगिरसैस्तथा ३७ यथाप्रमाणांहिमयाकृतोब्रह्माप्रसादज
: रुद्रश्चक्रोधजोविप्रायूयंप्रकृतयस्तथा ३८ सूर्याचंद्रमसौवायुर्भूमिरापोग्निरेवच सर्वेचनक्षत्रगणायच्चभूताभिशब्दितं ३९
अधिकारेषुवर्तंतेयथास्वंब्रह्मवादिनः सर्वेप्रमाणंहियथातथातच्छास्त्रमुत्तमं ४० भविष्यतिप्रमाणंवैएतन्मदनुशासनं त
स्मात्प्रवक्ष्यतेधर्मान्मनुःस्वायंभुवःस्वयं ४१ उशनाबृहस्पतिश्चैवयदोत्पन्नौभविष्यतः तदाप्रवक्ष्यतःशास्त्रंयुष्मन्मतिभि
रुद्धृतं ४२ स्वायंभुवेषुधर्मेषुशास्त्रेचौशनसेकृते बृहस्पतिमतेचैवलोकेषुप्रतिचारिते ४३ युष्मत्कृतमिदंशास्त्रंप्रजापा
लोवसुस्ततः बृहस्पतिसकाशाद्वैप्राप्स्यतेद्विजसत्तमाः ४४ सहिसद्भावितोराजामद्भक्तश्चभविष्यति तेनशास्त्रेणलोकेषु
क्रियाःसर्वाःकरिष्यति ४५ एतद्धिसर्वशास्त्राणांशास्त्रमुत्तमसंज्ञितं एतदर्थ्यंचधर्म्यंचयशस्यंचैतदुत्तमं ४६ अस्यप्र
वर्तनाच्चैवप्रजावंतोभविष्यथ सचराजाश्रियायुक्तोभविष्यतिमहान्वसुः ४७ संस्थितेचनृपेतस्मिन्शास्त्रमेतत्सनातनं
अंतर्धास्यतितत्सर्वमेतद्वःकथितंमया ४८ एतावदुक्त्वावचनमदृश्यःपुरुषोत्तमः विसृज्यतान्ऋषीन्सर्वान्कामपिप्र
स्थितोदिशं ४९ ४९

५०९

ततस्तेलोकपितरः सर्वलोकार्थचिंतकाः प्रावर्त्तयंततच्छास्त्रंधर्मयोनिंसनातनं ५० उत्पन्नेंगिरसेचैवयुगेप्रथमकल्पि
ते सांगोपनिषदंशास्त्रंस्थापयित्वाबृहस्पतौ ५१ जग्मुर्यथेप्सितंदेशंतपसेकृतनिश्चयाः धारणाः सर्वलोकानांस
र्वधर्मप्रवर्त्तकाः ५२ शांतिमोक्षधर्मेषुनारायणीये भीष्मउवाच ततोतीतेमहाकल्पेउत्पन्नेंगिरसः सुते बभूवुर्नि
र्वृतादेवाजातेदेवपुरोहिते १ बृहत्ब्रह्ममहच्चेतिशब्दाः पर्यायवाचकाः एभिः समन्वितोराजन्गुणैर्विद्वान्बृहस्पतिः
२ तस्यशिष्योबभूवाग्र्योराजोपरिचरोवसुः अधीतवांस्तदाशास्त्रंसम्यक्चित्रशिखंडिजं ३ सराजाभावितः पूर्वंदैवे
नविधिनावसुः पालयामासपृथिवींदिवमाखंडलोयथा ४ तस्ययज्ञोमहानासीदश्वमेधोमहात्मनः बृहस्पतिरुपा
ध्यायस्तत्रहोताबभूवह ५ प्रजापतिसुताश्चात्रसदस्याश्चाभवंस्त्रयः एकतश्चद्वितश्चैवत्रितश्चैवमहर्षयः ६
धनुषाक्षोथरैभ्यश्चअर्वावसुपरावसू ऋषिर्मेधातिथिश्चैवतांड्यश्चैवमहानृषिः ७ ऋषिः शांतिर्महाभागस्त
थावेदशिराश्चयः ऋषिः श्रेष्ठश्चकपिलः शालिहोत्रपितास्मृतः ८ आद्यः कठस्तैत्तिरिश्चवैशंपायनपूर्वजः।
कण्वोथदेवहोत्रश्चएतेषोडशकीर्तिताः ९ ॥ ॥

संभृताः सर्वसंभारास्तस्मिन्राजन्महाक्रतौ नतत्रपशुघातोभूत्सराजैवंस्थितोभवत् १० अहिंस्रः शुचिरक्षुद्रोनिराशीः कर्मसंस्तुतः आ
रण्यकपदोद्भूताभागास्तत्रोपकल्पिताः ११ प्रीतस्ततोस्यभगवान्देवदेवः पुरातनः साक्षात्तंदर्शयामाससोदृश्योन्येनकेनचित् १२
स्वयंभागमुपाघ्रायपुरोडाशंगृहीतवान् अदृश्येनहृतोभागोदेवेनहरिमेधसा १३ बृहस्पतिस्ततःक्रुद्धः स्रुचमुद्यम्यवेगितः आ
काशंघ्नन्स्रुचःपातैरोषादश्रूण्यवर्त्तयत् १४ उवाचचोपरिचरंमयाभागोयमुद्यतः ग्राह्यः स्वयंहिदेवेनमत्प्रत्यक्षंनसंशयः १५
युधिष्ठिरउ० उद्यतायज्ञभागाहिसाक्षात्प्राप्ताः सुरैरिह किमर्थमिहनप्राप्तोदर्शनंसहरिर्विभुः १६ भीष्मउवाच ततः सतंसमु
द्धूतंभूमिपालोमहान्वसुः प्रसादयामासमुनिंसदस्यास्तेचसर्वशः १७ ऊचुश्चैनमसंभ्रान्तानरोषंकर्त्तुमर्हसि नैषधर्मः कृ
तयुगेयस्त्वंरोषमचीकृथाः १८ अरोषणोह्यसौदेवोयस्यभागोयमुद्यतः नशक्यः सत्वयाद्रष्टुमस्माभिर्वाबृहस्पते १९
यस्यप्रसादंकुरुतेसवैतंद्रष्टुमर्हति एकतद्वितत्रिताश्चैवाचुस्ततश्चित्रशिखंडिनः २० वयंहिब्रह्मणः पुत्रामानसाः परिकीर्त्ति
ताः गतानिःश्रेयसार्थंहिकदाचिद्दिशमुत्तरां २१ तप्त्वावर्षसहस्राणिचरित्वातपउत्तमं एकपादस्थितास्सम्यक्काष्ठभूताः
समाहिताः २२ मेरोरुत्तरभागेतुक्षीरोदस्यानुकूलतः सदेशोयत्रनस्तप्तंतपः परमदारुणं २३ ॥ ॥ ॥ ॥ ॥

कथंपश्येमहिवयंदेवंनारायणात्मकं वरेण्यंवरदंतंवैदेवदेवंसनातनं २४ कथंपश्येमहिवयंदेवंनारायणमितिचिंति अथव्रतस्यावभृ
थेवागुवाचाशरीरिणी २५ स्निग्धगंभीरयावाचाप्रहर्षणकरीविभोः सुतप्तंवस्तपोविप्राःप्रसन्नेनांतरात्मना २६ यूयंजिज्ञासवोभक्ताः
कथंद्रक्ष्यथतंविभुं क्षीरोदधेरुत्तरतः श्वेतद्वीपोमहाप्रभः २७ तत्रनारायणपरामानवाश्चंद्रवर्चसः एकांतभावोपगतास्तेभक्ताःपु
रुषोत्तमं २८ तेसहस्रार्चिषंदेवंप्रविशंतिसनातनं अतींद्रियानिराहाराअनिस्पंदाःसुगंधिनः २९ एकांतिनस्तेपुरुषाःश्वेतद्वीपनि
वासिनः गच्छध्वंतत्रमुनयस्तत्रात्मामेप्रकाशितः ३० अथश्रुत्वावयंसर्वेवाचंतामशरीरिणीं यथाख्यातेनमार्गेणतंदेशंप्रतिपेदि
रे ३१ प्राप्यश्वेतंमहाद्वीपंतच्चित्तास्तद्दिदृक्षवः ततोस्मद्दृष्टिविषयस्ततोप्रतिहतोभवत् नचपश्यामपुरुषंतत्तेजोहृतदर्शनाः ततो
नः प्रादुरभवद्विज्ञानंदेवयोगजं नकिलातप्ततपसाशक्यतेद्रष्टुमंजसा ३२ ततः पुनर्वर्षशतंतप्त्वातात्कालिकंमहत् व्रतावसा
नेचशुभान्नरान्ददृशिरेवयं ३३ श्वेतांश्चंद्रप्रतीकाशान्सर्वलक्षणलक्षितान् नित्यांजलिकृतान्ब्रह्मजपतः प्रागुदङ्मुखा
न् ३४ मानसोनामसजपोजप्यतेतैर्महात्मभिः तेनैकाग्रमनस्त्वेनप्रीतोभवतिवैहरिः ३५ याःभवन्मुनिशार्दूलभाःसूर्यस्ययुगक्ष
ये एकैकस्यप्रभातादृक्साभवन्मानवस्यह ३६ तेजोनिवासःसद्वीपइतिवैमेनिरेवयं नतत्राभ्यधिकःकश्चित्सर्वेवैते।। ।। ।।

समेतेजसः ३७ अथसूर्यसहस्रस्यप्रभांयुगपदुत्थितां सहसादृष्टवंतस्मपुनरेवबृहस्पते ३८ सहिताश्चाभ्यधावंततस्तेमा
नवाद्भुतं कृतांजलिपुटाहृष्टानमइत्येववादिनः ३९ ततोहिवदतांतेषामश्रौषविपुलंध्वनिं बलिःकिलोपक्रियतेतस्यदेव
स्यतेननरैः ४० वयंतुतेजसातस्यसहसाहृतचेतसः नकिंचिदपिपश्यामोहतचक्षुर्बलेंद्रियाः ४१ एकस्तुशब्दोविततः
श्रुतोस्माभिरुदीरितः जितंतेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज इतिशब्दः श्रुतोस्मा
भिः शिक्षाक्षरसमन्वितः ४३ एतस्मिन्नंतरेवायुः सर्वगंधवहःशुचिः दिव्यान्युवाहपुष्पाणिकर्मण्याश्चौषधीस्तथा
४४ तैरिष्टः पंचकालज्ञैर्हरिरेकांतिभिर्नरैः भक्त्यापरमयायुक्तैर्मनोवाक्कर्मभिस्तदा ४५ नूनंतत्रागतोदेवोयथातैर्वा
गुदीरिता वयंत्वेनंनपश्यामोमोहितास्तस्यमायया ४६ मारुतेसंनिवृत्तेचबलौचप्रतिपादिते चिंताव्याकुलितात्मानोजा
ताःस्मोगिरसांवर ४७ मानवानांसहस्रेषुतेषुवैशुद्धयोनिषु अस्मान्नकश्चिन्मनसाचक्षुषावाप्यपूजयत ४८ तेपि
स्वस्थामुनिगणाएकभावमनुव्रताः नोस्मासुदधिरेभावंब्रह्मभावमनुष्ठिताः ४९ ततोस्मान्सुपरिश्रांतांस्तपसाचातिक

षितान् उवाचस्वस्थंकिमपिमूर्त्तंतत्राशरीरकं ५० देवउवाच दृष्टवाः पुरुषाश्चैताः सर्वेंद्रियविवर्जिताः दृष्टोभवतिदेवेशार
भिर्हृष्टैर्द्विजोत्तमैः ५१ गच्छध्वंमुनयः सर्वेयथागतमितोचिरात् नमशक्यस्त्वभक्तेनद्रष्टुंदेवः कथंचन ५२ कालेकालेनम
न्नारकांतिस्वमुपागतैः शक्योद्रष्टुमभवाग्भभामंडलदुर्दृशः महत्कार्येचकर्त्तव्येयुष्माभिर्द्विजसत्तमाः ५३ इतः कृतयुगे
तीतेविपर्यासंगतेपिच वैवस्वतेंतरेविप्राः प्राप्तेत्रेतायुगेपुनः ५४ सुराणांकार्यसिध्यर्थेसहायोवैभविष्यथ ततस्त
दद्भुतंवाक्यंनिशम्यैवामृतोपमं ५५ तस्यप्रसादात्प्राप्ताः सोदेशमीप्सितमंजसा एवंसुतपसाचैवहव्यकव्यैस्तथैवच ५६
देवोस्माभिर्नदृष्टः सकथंत्वंद्रष्टुमर्हसि नारायणोमहद्भूतंविश्वस्रक्हव्यकव्यभुक् ५७ अनादिनिधनोव्यक्तोदेवदा
नवपूजितः एवमेकतवाक्येनहितंत्रितमतेनच ५८ ॥ ॥श्रीकृष्णायनमः ॥ ॥श्रीकृष्णायनमः॥ ॥॥

६३ अध्यायः यदा भागवतो त्यर्थमित्यादि रध्यायो वेसवानां हिंसायज्ञवर्जनार्थः १ २ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अनुनीतः सदस्यैश्च बृहस्पतिरुदारधीः समानयत्ततो यज्ञं दैवतं समपूजयत् ५८ समाप्तयज्ञो राजापि प्रजां पालितवा
न्वसुः ब्रह्मशापाद्दिवो भ्रष्टः प्रविवेश महीं ततः ६० स राजा राजशार्दूल सत्यधर्मपरायणः अन्तर्भूमिगतश्चैव सततं ध
र्मवत्सलः ६१ नारायणपरो भूत्वा नारायणजपं जपन् तस्यैव च प्रसादेन पुनरेवोत्थितस्तु सः ६२ महीतलाद्ग
तः स्थानं ब्रह्मणः समनंतरं परांगतिमनुप्राप्त इति नैष्ठिकमंजसा ६३ शांतौ मोक्षधर्मेषु नारायणीये युधिष्ठिर
उवाच यदा भागवतो त्यर्थमासीद्राजा महान्वसुः किमर्थं स परिभ्रष्टो विवेश विवरं भुवः १ भीष्म उवाच अत्रा
प्युदाहरंतीममितिहासं पुरातनं ऋषीणां चैव संवादं त्रिदशानां च भारत २ अजेन यष्टव्यमिति प्राहुर्देवा द्विजो
त्तमान् स च छागो प्यजो ज्ञेयो नान्यः पशुरिति स्थितिः ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अजसंज्ञानि बीजानि। तस्मादेषु एतेषां प्रयुक्तमेतौ यदजस्तमजमालभंत सोजादुदक्रामत्स इमां प्राविशत्तस्मादियं मेध्याभवत्तमस्यामन्ववायंस्सोनुगतो व्री
हिरभवदिति बह्वृचब्राह्मणं। सर्वेषां पशूनां। सः यज्ञो मेध्यता मेधः इमां पृथिवीं प्रविष्टोः ततो व्याप्य अन्वेषितवंतः इयं श्रुतिः पुरोडाशस्तुतिमात्रपरा न तु प
शूनां मेध्यत्वप्रतिपादनपरा। नहि निंदा निंद्यं निंदितुं प्रवर्तते अपितु विधेयं स्तोतुमिति न्यायात् इति भोगलोलुपानां देवानां मतं। वीतरागाणां ऋषीणां तु मा
नांतरविसंवादात् अहिंसाशास्त्रानुग्रहात् च अवांतरतात्पर्येण प्रतीयमानोऽर्थो यथाभूत एव न तु सः स्वार्थे अप्रमाणं यथाहुः संप्रदायविदः विरोधे गु

ऋषय ऊचुः बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः अजसंज्ञानि बीजानि छागं नो हंतुमर्हथ ४ नैष धर्मः सतां देवा यत्र
वध्येत वै पशुः इदं कृतयुगं श्रेष्ठं कथं वध्येत वै पशुः ५ भीष्म उवाच तेषां संवदतामेवमृषीणां विबुधैः सह मार्गागतो
नृपश्रेष्ठस्तं देशं प्राप्तवान्वसुः ६ ॥ श्रीरामनारायणवासुदेवश्रीलक्ष्मीविष्णुमधुकैटभारिः ॥ ॥ ॥ ॥

णवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः इति तत्र यजमानः प्रस्तर इत्यादिः प्रस्तरयजमानयोरभेदस्य प्रत्यक्षविरोधात् प्रस्तरस्तु
त्यर्थं गुणवादोऽयं अग्निर्हिमस्य भेषजमिति लोकावगतार्थत्वादनुवादः मेधातिथिं ह काण्वायनं मेषो भूत्वा जहारेत्यादिर्विरोधानुवादयोरभावात् भूता
र्थवाद इति वृद्धाः श्लोकार्थः न चापि कृतयुगे नालंभविधिना पुरुषार्थे निषेधस्य विरोधोस्ति अन्तार्थवादोप्ययं स्वार्थे अवांतरतात्पर्यविषयादेवताधिकरणन्या
येन प्रामाण्यमर्हति अन्यथा भारतरामायणादीनामपि स्वार्थे प्रामाण्यं विहन्येतेति तस्मादजस्यापि मेधस्य बीजेषु संक्रमाद्बीजान्येवाजसंज्ञानीति युक्तं

ंतरिक्षचरः श्रीमान्समग्रबलवाहनः तं दृष्ट्वा सहसायांतं वसुं ते त्वंतरिक्षगं ७ ऊचुर्द्विजातयो देवानेषच्छेत्स्यति संशयं यज्वा दानपतिः
श्रेष्ठः सर्वभूतहितः प्रियः कथंस्विदन्यथा ब्रूयादेष वाक्यं महान्वसुः एवं ते संविदं कृत्वा विबुधा ऋषयस्तथा ८ अपृच्छन्सहितो नेस
वसुं राजानमंतिकात् भो राजन्केन यष्टव्यमजेनाहो स्विदौषधैः ९ एतन्नः संशयं छिंधि प्रमाणं नो भवान्मतः स तान्कृतांजलिर्भू
त्वा परिपप्रच्छ वै वसुः १० कस्य वै को मतः कामो ब्रूत सत्यं द्विजोत्तमाः ऋषय ऊचुः धान्यैर्यष्टव्यमित्येव पक्षोस्माकं नराधिप
देवानां तु पशुः पक्षो मतो राजन्वदस्व नः ११ भीष्म उवाच देवानां तु मतं ज्ञात्वा वसुना पक्षसंश्रयात् छागेनाजेन यष्टव्यमेवमुक्तं
वचस्तदा १२ कुपितास्ततः सर्वे मुनयः सूर्यवर्चसः ऊचुर्वसुं विमानस्थं देवपक्षार्थवादिनं १३ सुरपक्षो गृहीतस्ते यस्मा
त्तस्माद्दिवः पत त्वद्यप्रभृति ते राजन्नाकाशे विहता गतिः १४ अस्मच्छापाभिघातेन महीं भित्वा प्रवेक्ष्यसि ततस्तस्मिन्मुहूर्ते
थ राजोपरिचरस्तदा १५ अधो वै संबभूवाशु भूमेर्विवरगो नृप स्मृतिस्त्वेवं न विजहौ तदा नारायणाज्ञया १६ देवास्तु सहि
ताः सर्वे वसोः शापविमोक्षणं चिंतयामासुरव्यग्राः सुकृतं हि नृपस्य तत् १७ १७ १७ १७ ॥॥

२४ अत्र राज्ञः शापहेतुत्वात् हिंसायज्ञो धर्मोऽपि वसोर्धाराभागप्रापकदेवानुग्रहवशात् किंचित्फलमपि जनयतीत्यत्रैव स्वचित्तं २५ २६ २७ २८ २९ ३०

मो०
५१३

513

अनेनास्मत्कृते राज्ञा शापः प्राप्तो महात्मना अस्य प्रतिप्रियं कार्यं सहितैर्नो दिवौकसः १८ इति बुध्वा व्यवस्याशु गत्वा नि
श्चयमीश्वराः ऊचुः संहृष्टमनसो राजोपरिचरं तदा १९ ब्रह्मण्यदेवभक्तस्त्वं सुरासुरगुरुर्हरिः कामं स तव तुष्टात्मा ॥
कुर्याच्छापविमोक्षणं २० मानना तु द्विजातीनां कर्त्तव्या वै महात्मनां अवश्यं तपसा तेषां फलितव्यं नृपोत्तम २१
यतस्त्वं सहसा भ्रष्ट आकाशान्मेदिनीतलं एकं त्वनुग्रहं तुभ्यं दद्मो वै नृपसत्तम २२ यावत्त्वं शापदोषेण कालमासि
ष्यसेऽनघ भूमेर्विवरगो भूत्वा तावन्तं कालमाप्स्यसि २३ यज्ञेषु सुहुतां विप्रैर्वसोर्द्धारां समाहितैः प्राप्स्यसेऽस्मदनु
ध्यानान्मा च त्वां ग्लानिरस्पृशत् २४ न क्षुत्पिपासे राजेन्द्र भूमेश्छिद्रे भविष्यतः वसोर्द्धाराभिपीतत्वात्तेजसाप्यायि
तेन च २५ स देवोऽस्मद्वरात्प्रीतो ब्रह्मलोकं हि नेष्यति एवं दत्वा वरं राज्ञे सर्वे ते च दिवौकसः २६ गताः स्वभवनं देवा
ऋषयश्च तपोधनाः चक्रे च सततं पूजां विष्वक्सेनाय भारत २७ जप्यं जगौ च सततं नारायणमुखोद्गतं त-
त्रापि पंचभिर्यज्ञैः पंचकालानरिंदम २८ अयजद्धरिं सुरपतिं भूमेर्विवरगोऽपि सन् ततोऽस्य तुष्टो भगवान् भक्त्या
नारायणो हरिः २९ अनन्यभक्तस्य सतस्तत्परस्य जितात्मनः वरदो भगवान्विष्णुः समीपस्थं द्विजोत्तमं ३०

एम०
५१३

३७ वसोर्घोरेस्यलुक्समासः ३८ अध्यायतात्पर्यमाहकेवलमिति ४० अध्यायः प्राप्येति १ २ ३ ॥ ॥ ॥ ॥ ॥

गरुत्मंतंमहावेगमावभाषेस्मितंतदा द्विजोत्तममहाभागपश्यतांवचनान्मम ३१ संम्राड्राजावसुर्नामधर्मात्मासंशित
व्रतः ब्राह्मणानांप्रकोपेनप्रविष्टोवसुधातलं ३२ मानितास्तेतुविप्रेंद्रास्त्वंतुगच्छद्विजोत्तम भूमेर्विवरसंगुप्तंगरुडेहममाज्ञ
या ३३ अधश्चरंनृपश्रेष्ठंखेचरंकुरुमाचिरं गरुत्मानथविक्षिप्यपक्षौमारुतवेगवान् ३४ विवेशविवरंभूमेर्यत्रास्तेपा
र्थिवोवसुः ततएनंसमुत्क्षिप्यसहसाविनतासुतः ३५ उत्पपातनभस्तूर्णंतत्रचैनममुंचत अस्मिन्मुहूर्तेसंजज्ञेराजो
परिचरः पुनः ३६ सशरीरोगतश्चैवब्रह्मलोकंनृपोत्तमः एवंतेनापिकौंतेयवाग्दोषाद्देवताज्ञया ३७ प्राप्तागतिरय
ज्वार्हाद्विजशापान्महात्मना केवलंपुरुषस्तेनसेवितोहरिरीश्वरः ततः शीघ्रंजहौशापंब्रह्मलोकमवापच ३९ भीष्म
उवाच एतत्तेसर्वमाख्यातंसंभूतामानवायथा नारदोपियथाश्वेतंद्वीपंसगतवानृषिः तत्तेसर्वंप्रवक्ष्यामिशृणुष्वैक
मनानृप ४० शांतौमोक्षधर्मेषुनारायणीये भीष्मउवाच प्राप्यश्वेतंमहाद्वीपंनारदोभगवानृषिः ददर्शतानेवन
रान्श्वेतांश्चंद्रसमप्रभान् १ पूजयामासशिरसामनसातैश्चपूजितः दिदृक्षुर्जप्यपरमः सर्वकृच्छ्रगतः स्थितः २
भूत्वैकाग्रमनाविप्रऊर्ध्वबाहुः समाहितः स्तोत्रंजगौसविश्वायनिर्गुणायगुणात्मने ३ ॥ ॥ ॥॥

मो०
५१४

514

देवैः इंद्रियैर्दीव्यतीति जीवः देवैरेव सत्त्वस्पर्शी अंतर्यामी १ निष्क्रियः आपकत्वात् २ निर्गुणः असंगत्वात् ३ लोकसाक्षी उदासीनबोधरूपत्वात् ४ क्षेत्रज्ञः देहद्वयप्रकाशको जीवः ५ पुरुषोत्तमः शरीरजीवविभ्यो ऽन्यत्वात् ६ अनंत एवानंतः देशतः कालतः वस्तुतश्च परिच्छेदशून्यः ७ पुराणि व्यष्टिस्थूलसूक्ष्मकारणशरीराणि शेते इति दहतीति पुरुषः अनंत एवानंत इत्युक्तेः ८ महापुरुषः समष्टिस्थूलादिदाहकत्वात् ९ अनंत एव पुरुषेषु उत्तमयादिषु उत्तमः सत्यज्ञानानंतानंदरूपः १० त्रिगुणः सादिनामायिकं रूपं सौ निःसत्त्वरजस्तमोरूपं ११ प्रधान तत्त्वसंघातरूपं १२ अमृत सुधा १३ अमृताहे

नारद उवाच नमस्ते देवदेवेश १ निष्क्रिय २ निर्गुण ३ लोकसाक्षिन् ४ क्षेत्रज्ञ ५ पुरुषोत्तम ६ अनंत ७ पुरुष ८ महापुरुष ९ पुरुषोत्तम १० त्रिगुण ११ प्रधान १२ अमृत १३ अमृताख्य १४ अनंताख्य १५ व्योम १६ सनातन १७ सदसद्व्यक्ताव्यक्त १८ ऋतधामन् १९ आदिदेव २० वसुप्रद २१ प्रजापते २२ [illegible] सुप्रजापते २३ वनस्पते २४ महाप्रजापते २५ ऊर्जस्पते २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वास्तव्यं १४ अनंताख्य शेषशयन १५ व्योम आकाशाख्य १६ सनातनो नादिः १७ सदसतोः कार्यकारणयोः रूपेण व्यक्तो ऽव्यक्तश्च ग्राह्यो ऽग्राह्यश्चेत्यर्थः १८ ऋतं सत्यं अविकारं धाम प्रकाशो यस्य १९ आदिदेवो नारायणः २० वसुप्रदः कर्मफलदाता २१ प्रजापतिर्दक्षादिः २२ सुप्रजापतिः सनकादिः मोक्षगुरुत्वात् २३ वनस्पतिः अश्वत्थादिः २४ महाप्रजापतिश्चतुर्मुखः २५ ऊर्जस्पते ऊर्जो ब्रह्मादयो जीवरूपाः पशवः तेषां पते अलुक्समासः एकत्वेनाभि मायं २६

राम०
५१५

वाचस्पतिः वाचः प्रवर्त्तको देवाचार्यो वा २७ जगत्पतिरिंद्रः २८ मनस्पतिः सत्वात्मा २९ दिवस्पतिः सूर्यः ३० मरुत्पतिः प्राणवायुः ३१ सलिलपतिर्वरुणः ३२ पृथि
वीपतिः राजा ३३ दिक्पतिः इंद्रादिः ३३ सर्वनिवास महाप्रलये जगदाधार ३४ गुह्यस्य प्रकाशय ३५ ब्रह्मपुरोहित ब्रह्मणो वेदस्य रः यो ब्रह्माणं विदधाति पू
र्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः ३६ ब्रह्मकायिक ब्राह्मणशरीरसाध्ययज्ञाध्ययनादिरूप ३७

वाचस्पते २७ जगत्पते २८ मनस्पते २९ दिवस्पते ३० मरुत्पते ३१ सलिलपते ३२ दिक्पते ३३ सर्वनिवास ३४ गुह्य ३५
ब्रह्मपुरोहित ३६ ब्रह्मकायिक ३७ महाराजिक ३८ चातुर्महाराजिक ३९ आभास्वर ४० महाभास्वर ४१ सप्तम
हाभाग ४२ याम्य ४३ महायाम्य ४४ संज्ञासंज्ञ ४५ तुषित ४६ महातुषित ४७ प्रमर्दन ४८ परिनिर्मित ४९ अप
रिनिर्मित ५० वशवर्त्तिन ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

महाराजिकादयश्चत्वारो देवानां गणविशेषाः ४१ सप्तभिर्गायत्र्यादिभिरर्चनीया यः सेव्यत एव महांतो यज्ञभागा यस्य स सप्तमहाभागः ४२ याम्य यमगण ४३ महा
याम्य चित्रगुप्तादिरूप ४४ संज्ञा यमपत्नी तन्नामक ४५ तुषित महातुषितौ देवगणविशेषौ ४७ प्रमर्दनो मृत्युः ४८ परिनिर्मितं मृत्युसहायत्वेन कल्पितं को
मरोगादि ४९ अपरिनिर्मितं तदन्यत् ग्राममत्र्यारोग्यादि ५० वशवर्त्ती कामादिग्रस्तोन ५२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अपरिनिंदितः शमादिमलात् ५२ अपरिमितः सर्वजातीयद्यपिरूपेषुअनंतः ५३ वशवर्त्तो भगस्यः ५४ अवशवर्त्ती शास्ता ५५ यज्ञोग्निहोत्रादिः ५६ महायज्ञो ब्रह्मयज्ञा
दिः ५७ यज्ञसंभवो ज्ञातिगादिः ५८ यज्ञयोनिर्वेदः ५९ यज्ञगर्भो ग्निः ६० यज्ञहृदयं यज्ञो गोपासनारूपः ६४ पंचकालाः अहोरात्र १ मास २ वर्ष ३ यन ४ संव
त्सराः पंचकर्त्तारः अभिगमनं तथावर्त्ती करणं च श्ययाग्विधंविविधाचश्ययज्ञे ष्टोदैवैचैवात्र पंचमेशरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः मार्गवाविपरीतंवा

अपरिनिंदित ५२ अपरिमित ५३ वशवर्त्तिन ५४ अवशवर्त्तिन ५५ यज्ञ ५६ महायज्ञ ५७ यज्ञसंभव ५८ यज्ञयोनि ५९
यज्ञगर्भ ६० यज्ञहृदय ६१ यज्ञस्नात ६२ यज्ञभागह ६३ पंचयज्ञ ६४ पंचकालकर्तृपते ६५ पंचरात्रिक ६६ वैकुंठ ६७ ८२
अपराजित ६८ मानसिक ६९ नामनामिक ७० परस्वामिन ७१ सुस्नात ७२ हंस ७३ परमहंस ७४ महाहंस ७५
परमयाज्ञिक ७६ सांख्ययोग ७७

पंचैतेतस्यहेतवइतिगीतोक्तास्तैर्व्याप्तेनहृः पंचरात्रागमगम्यः ६६ वैकुंठः अकुंठितविकुंठायाः पुत्रेतिवा ६८ मानसिकमनउपाधिक ६९ नामनामिकना
म्निनाम्निविदितः नामानिसर्वाणियमाविशंतीतिश्रुतेः ७० परोक्षज्ञानस्यस्वामी ७१ सुस्नातसमाप्तवेदव्रत ७२ हंसस्त्रिदंडी ७३ परमहंसएकदंडी
७४ महाहंसोदंडादिहीनः ७५

७८ अमरत्वंजीवः ७९ हिरण्यं हृदयं ८० देवाः इंद्रियाणि ८१ कुंभसमुद्रजत्वं ब्रह्मवेदः पद्मं ब्रह्मांडं तेन मुखमयनात्तु अग्रे शयादि नरसंज्ञकः ८५ विश्वकृत्सर्वेनोगमनशीलः
भक्तपालनार्थं सेनायस्य ८६ जगति सन्नारूपेणान्वयोऽस्य ८७ वडवामुखजोऽग्निस्त्वमेव ८८ सारथिरश्मिस्त्वं सारथिरस्य केशीति मंत्रवर्णात् अग्निर्वायुः सूर्यश्च
केशिन इति स्मृतो मत्सामत्रामिति रेव प्रकरणाद्भासः ९५ चक्षुरंशो अक्षिणी न संस्कृतं यज्ञियं सर्पिः ९८ भानुभोसकः ९९ विदिक्कुरिकोणः १०१ ब्रह्मसेतुमापि

सांख्यमूर्त्ते ७८ अमरेशाय ७९ हिरण्येशाय ८० देवेशाय ८१ कुंभेशाय ८२ ब्रह्मेशाय ८३ पद्मेशाय ८४ विश्वेश्वर ८५ विश्व
केतन ८६ त्वंजगदन्वयः ८७ त्वंजगत्प्रकृतिः ८६ त्वमग्निरास्य ८७ वडवामुखोऽग्निः ८८ त्वमाकृतिः ८९ सारथिः
९० त्वंवषट्कारः ९१ त्वमोंकारः त्वंतपः ९२ त्वंमनः ९३ त्वंचन्द्रमाः ९४ त्वंचक्षुराज्यं ९६ त्वंसूर्यः ९७ त्वंदिशांगजः
९८ त्वंदिग्भानो ९९ विदिग्भानो १०० हयशिरः १ प्रथमत्रिसौपर्णः २ वर्णाधरः ३ पंचाग्ने ४ त्रिणाचिकेत ५

त्वादीनि त्रीणि सुपर्णानि तैत्तिरीयोपनिषदि पठ्यंते तत्र प्रथमं सवितुर्देवस्य त्वं जगत्कर्त्ता समर्थः चतुष्कपर्दा युवतिः सुपेशा इत्यादिकं द्वितीयं मंत्रत्रयं वा प्रथम
त्रिसुपर्णो २ वर्णाः ब्राह्मणादयस्तेषां धारक ३ पंचगार्हपत्यदक्षिणाग्न्याहवनीयसभ्यावसथ्याख्याग्निरूप ४ त्रिणाचिकेतनाचिकेताख्योऽग्निः त्रिवार
चितोयेन स त्रिणाचिकेतसंज्ञः ५ ५

516

मंङ्गानिशिक्षादीनिधीयंते स्मिन्निति सांगवेदरूप ६ साग्न्येति यज्ञेष्वमासेनिचंद्रेसामनीताभ्यांगेयत्रोतोवाहायीतिसामप्राग्ज्येतिः ७ ज्येष्ठेनेंदिवरश्यस्यामरवि
गीयमानेसामज्येष्ठसाम ८ सामिकानांसामगानांव्रतैर्वदव्रतंधारयतीसामिकव्रतधरः ९ अथर्वशिरः संज्ञाउपनिषत्तद्रूप १० पंचमहाकल्पाः सौरशाक्त

षडंगनिधान ६ साग्न्योतिष ७ ज्येष्ठसामग ८ सामिकव्रतधर ९ अथर्वशिरः १० पंचमहाकल्प ११ फेनपाचार्य १२ वा
लखिल्य १३ वैखानस १४ अभग्नयोग १५ अभग्नपरिसंख्यान १६ युगादि १७ युगमध्य १८ युगनिधन १९ आखंडल
२० प्राचीनगर्भ २१ कौशिक २२ पुरुष्टुत २४ पुरुहूत २५ विश्वकृत २६ अनंतगते २७ अनंतभोग २८ अनंत २९
अनादि ३० अमध्य ३१ अव्यक्तमध्य ३२ अव्यक्तनिधन ३३ व्रतावास ३४ समुद्राधिवास ३५ यशोवास ३६
तपोवास ३७ दमावास ३८ लक्ष्म्यावास ३९ विद्यावास ४० कीर्त्यावास ४१ श्रीवास ४२ सर्वावास ४३ वासुदेव
४४ सर्वछंदक ४५ हरिहय ४६ हरिमेध ४७ महायज्ञभागहर ४८ वरप्रदसुखप्रद ४९ धनप्रद ५० हरिमेध ५१

गारोत्राशौवेदे सवागमात्मात्रतिपाद्य १५ परिसंख्यानंविचारः १६ युगनिधनंयुगांतः १९ आखंडलः इंद्रः २० प्राचीनगर्भकौशिकौमुनी २२ पुरुवद्रु २३
२७ भोगः शरीरं ४४ सर्वछंदकमनोरथप्रद ४५ हरिः कपिः सस्वरामावताररहेयोयस्यायस्य ४६ हरिमेधअश्वमेधा ४७ महायज्ञोयोगः तत्रभागोहरो
मंडस्यजीवः तस्यहर्ता ५० हरेर्मेधावुद्धिर्यस्यहरिमेत्र ५१ ॥

महानियमोयमादीनामेवपराकाष्ठा ५० प्रवचनेनस्वाध्यायेनगतःस्थितोब्रह्मचारी ६४ महतीविपदादिस्ट्ष्टिरूपाविभूतिरहस्य ६५ माहात्म्ययुक्तंविराडाख्यंशरी
रमस्य ६६ पवित्राणिशुद्धिक्रियाकारणपकारीति ६७ महापवित्राणिपावमानीसूक्तादीति ६८ हिरण्मयानिमंडलब्रह्मेरणादीनि ६९ बृहत्त्वेराखब्रह्मेति

यम ५१ नियम ५२ महानियम ५४ कृच्छ्र ५५ अतिकृच्छ्र ५६ महाकृच्छ्रसर्वकृच्छ्र ५७ नियमधर ५८ निवृत्तभ्रम ५९ प्रव
चनगतग्रश्निगर्भप्रवृत्त ५८ प्रवृत्तवेदक्रिय ५९ अज ६० सर्वगत ६१ सर्वदर्शिन ६२ अग्राह्य ६३ अचल ६४ महा
विभूते ६५ माहात्म्यशरीर ६६ पवित्र ६७ महापवित्र ६८ हिरण्मय ६९ बृहन् ७० अप्रतर्क्य ७१ अविज्ञेय ७२ ब्र
ह्माग्र ७३ प्रजासर्गकर ७४ प्रजानिधनकर ७५ महामायाधर ७६ चित्रशिखंडिन ७७ वरप्रद ७८ पुरोडाशभागहर
७९ गताध्वर ८० छिन्नतृष्ण ८१ छिन्नसंशय ८२ सर्वतोवृत्त ८३ निवृत्तरूप ८४ ब्राह्मणरूप ८५ ब्राह्मणप्रिय
८६ विश्वमूर्ते ८७ महामूर्ते ८८ बांधव ८९ भक्तवत्सल ९० ब्रह्मराप ९१ देवभक्तोहंत्वांदिदृक्षुरेकांतदर्शना
यनमोनमः १९२ शांतोमोक्षधर्मेषुमहापुरुषस्तवः समाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्य... का१

नयचतुष्टयात्मकोर्थः ७० अप्रतर्क्यस्तर्कागम्यः ७१ अविज्ञेयोरूपादिहीनत्वात् ७२ ब्रह्मणोंकार्यकारणमहरिणानामधेयंब्रह्माग्रंसहारणं
७९ गताध्वरप्राप्तयज्ञ ८० ८१ सर्वतोवृत्तंवर्त्तनंयस्य ९१ दिदृक्षुरस्मिएकमेवतेयज्ञानत्वात्विभागहीनंवस्तुअप्यंतेगम्यते ... यस्मिनत्तंतंनि
विकल्पकंदर्शनंतस्मैमोक्षायेत्यर्थः १९२ शांतोपरिहृष्टाषष्टितमः १६२ ॥

एवं विश्वानि सर्वाणि रूपाणि धारयतीति विश्वरूपधृक् १ एतेद्रूपसहस्राणि किंचिदित्यादिना ३ ज्ञानरूपस्वर्णयोरंतरे वैजात्यकृतो भेदो ज्ञेयः ७ सहस्र

भी० ५१७

517

भीष्म उवाच एवमुक्तस्ततः स भगवान् गुह्यैस्तथ्यैश्च नामभिः तं मुनिं दर्शयामास नारदं विश्वरूपधृक् १ किंचिच्चंद्राद्विशुद्धात्मा किंचिच्चंद्राद्विशेषवान् कृशानुवर्णः किंचिच्च किंचिद्धिष्ण्याकृतिः प्रभुः २ शुकपत्रनिभः क्वचित् किंचित्स्फटिकसन्निभः नीलांजनचयप्रख्यो जातरूपप्रभः क्वचित् ३ प्रवालांकुरवर्णश्च श्वेतवर्णस्तथा क्वचित् क्वचित्सुवर्णवर्णाभो वैडूर्यसदृशः क्वचित् ४ नीलवैडूर्यसदृश इंद्रनीलनिभः क्वचित् मयूरग्रीववर्णाभो मुक्ताहारनिभः क्वचित् ५ एतान्बहुविधान्वर्णान्रूपे बिभ्रत्सनातनः सहस्रनयनः श्रीमाञ्छतशीर्षः सहस्रपात् ६ सहस्रोदरबाहुश्च अव्यक्त इति च क्वचित् ओंकारमुद्गिरन्वक्त्रात्सावित्रीं च तदन्वयां ७ शेषेभ्यश्चैव वक्त्रेभ्यश्चतुर्वेदान्गिरन्बहून् आरण्यकं जगौ देवो हरिर्नारायणो वशी ८ वेदीं कमंडलुं शुभ्रान्मणीनुपानहौ कुशान् अजिनं दंडकाष्ठं च ज्वलितं च हुताशनं ९ धारयामास देवेशो हस्तैर्यज्ञपतिस्तदा तं प्रसन्नं प्रसन्नात्मा नारदो द्विजसत्तमः १० वाग्यतः प्रणतो भूत्वा ववंदे परमेश्वरं तमुवाच नतं मूर्ध्ना देवानामादिरव्ययः ११ श्रीभगवानुवाच एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः इमं देशमनुप्राप्ता मम द-

शां०

५१७

नयनरम्यादिना विश्वं वेदयज्ञात्मकममनन्तुरिति दर्शितं ८ ९ १० ११ १२ १३ १४ १५

हृषीकेशंददृशुः पुरुषव्यघ्रस्य आर्षः २० मांप्रवेक्ष्यंतीत्युक्तं तत्रप्रवेशार्थं आत्मस्वरूपमाह नदृश्यइत्यादिना नघ्रेयः चास्वादनीयत्वादिवर्जितः यतोवागंधादिनावि

नचमांतेद्रक्ष्यंतिरेनचद्रक्ष्यंतिकश्चन ऋतेह्येकांतिकश्रेष्ठात्त्वंचैवैकांतिकोत्तमः १३ ममैतास्तनवः श्रेष्ठाज्ञाताधर्मगृहेद्वि
ज नाख्यंभजस्वसततंसाधयस्वयथागतं १४ वृणीष्वचवरंविप्रमत्तस्त्वंयदिहेच्छसि प्रसन्नोहंतवाद्येहविश्वमूर्तिरिहाव्ययः
१५ नारदउवाच अद्यमेतपसोदेवयमस्यनियमस्यच सद्यःफलमवाप्तंवैदृष्टोयद्भगवान्मम १६ वरएषममात्यंतंदृष्टस्त्वं
यत्सनातनः भगवन्विश्वदृक्सिंहः सर्वमूर्तिर्महाप्रभुः १७ भीष्मउवाच एवंसंदर्शयित्वातुनारदंपरमेष्ठिनं उवाचवचनं
भूयोगच्छनारदमाचिरं १८ इमेह्यनिंद्रियाहाराभद्भक्ताश्चंद्रवर्चसः एकाग्राश्चिंतयेयुर्मांनैषांविघ्नोभवेदिति १९
सिद्धाह्येतेमहाभागाः पुराह्येकांतिनोभवन् तमोरजोभिर्निर्मुक्तामांप्रवेक्ष्यंत्यसंशयं २० नदृश्यश्चक्षुषायोसौनस्पृ
श्यः स्पर्शनेनच नघ्रेयश्चैवगंधेनरसेनचविवर्जितः २१ सत्वंरजस्तमश्चैवनगुणास्तंभजंतिवै यश्चसर्वगतः सा
क्षीलोकस्यात्मेतिकथ्यते २२ ॥ ॥

वर्जितः २१ रूपाद्यभावमाह सत्वमिति कार्यकारणातीतमित्यर्थः २२ २२ २२ २२

अस्योपाधिधर्मास्पर्शित्वमाह । भूतेति । अजो नित्य इति जन्मादिसर्वभावविकारनिषेधः शाश्वत इति प्रकृतिवत्परिणामराहित्यं यतो निर्गुणः चत्वं गुण
हन्त्रमिति न्यायेन साम्यदशायामपि गुणानां परिणामरूपत्वापरिणामात् गुणाश्च पि गुणवत्त्वेनानभवत्यनवस्था मानान्तरश्चाह निष्कल इति एकगु
णाशरीरे गुणान्तरस्यापि उपसर्जनत्वेन प्रवेशसत्त्वान्न गुणानां निष्कलत्वलक्षणं निरवयवत्वमस्तीति तत्रोप्यसङ्ग ... त्येतदर्थः २३ द्विहीदृशो म्यः व

भूतग्रामशरीरेषु नश्यत्सु न विनश्यति अजो नित्यः शाश्वतश्च निर्गुणो निष्कलस्तथा २३ द्विहीदृशोप्यत्तेभ्यः ख्यातोयः
पंचविंशकः पुरुषो निष्क्रियश्चैव ज्ञानदृश्यश्च कथ्यते २४ यं प्रविश्य भवंतीह मुक्ता वै द्विजसत्तमाः स वासुदेवो विज्ञेयः
परमात्मा सनातनः २५ पश्य देवस्य माहात्म्यं महिमानं च नारद शुभाशुभैः कर्मभिर्यो न लिप्यति कदाचन २६ सत्त्वं रज
स्तमश्चेति गुणानेतान्प्रचक्षते एते सर्वशरीरेषु तिष्ठंति विचरंति च २७ एतान्गुणांस्तु क्षेत्रज्ञो भुंक्ते नैभिः समुज्यते
निर्गुणो गुणभुक्चैव गुणस्रष्टा गुणाधिकः २८ जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयंते ज्योति
र्वायौ प्रलीयते खे वायुः प्रलयं याति मनस्याकाशमेव च मनो हि परमं भूतं तदव्यक्ते प्रलीयते २९ ॥ ॥ ॥ ॥

तुर्विंशतिभ्यः ज्ञानदृश्यः सूक्ष्मबुद्धिग्राह्यः दृश्यते त्वग्र्यया बुद्ध्या इति श्रुतेः प्रवेशं हेतुरूपमुपपाद्योपसंहरति यमि ... ति २४ तं प्रविश्य ... सः न लिप्यत
इत्यर्थः २६ गुणाधिकः गुणेभ्योऽतिरिक्तः २७ निर्गुणत्वव्यक्तमव्यक्तस्य कार्यस्य प्रलयमाह जगदित्यादिना २९ ॥ ॥ ॥ ॥

अव्यक्तमितिअव्यक्तस्यापिलयंवदन्सांख्यमतमप्यास्त ३० एतेनव्यतिरेकमुखेनदृढयतिनित्यमितिनित्यंअविनाशिभूतंनित्यमस्तिइदंपरस्मात्मन्यत्रासीसर्यः ३१
एवंतत्पदार्थस्वरूपमुक्त्वात्वंपदार्थस्वरूपमाहसर्वेति।सर्वेषांभूतानांआत्मभूतः प्रत्यग्रूपोवासुदेवःएतदेवकथमित्यतआहपृथिवीत्यादिना ३२ सप्तदशक
विष्टत्रात्नखाग्रेभ्यइतिश्रुतेरर्थंसंगृह्णाति।तदिति।आविशतीतिजीवेशौयोयोवाब्रह्मअभिमन्ताजीवोयस्यतस्यक्षेत्र्यपासः लघुविक्रमः शीघ्रकारी।एतेन

अव्यक्तंपुरुषेब्रह्मन्निष्क्रियेसंप्रलीयते नास्तितस्मात्परतरः पुरुषाद्वैसनातनात् ३० नित्यंहिनास्तिजगतिभूतंस्थावरजंग
मं ऋतेतमेकंपुरुषंवासुदेवंसनातनं ३१ सर्वभूतात्मभूतोहिवासुदेवोमहाबलः पृथिवीवायुराकाशमापोज्योतिश्चपंच
मं ३२ तेसमेतामहात्मानः शरीरमितिसंज्ञितं तदाविशतियोब्रह्मन्नदृश्योलघुविक्रमः ३३ उत्पन्नएवभवतिशरीरंचेष्टय
न्प्रभुः नविनाधातुसंघातंशरीरंभवतिक्वचित् ३४ नचजीवंविनाब्रह्मन्वायवश्चेष्टयंत्युत सजीवः परिसंख्यातः शेषः सं
कर्षणः प्रभुः ३५ ॥।

दृष्टिसृष्टिरुक्ताघटाकाशवदुपाध्युत्पत्त्याउत्पन्नइति।एवशब्दोनवधारणे ३३ प्रवेशाभावेचेष्टानुपपत्तिमाहनविनेति ३४ सइतियोयंप्रविष्टःसजी
वः संकर्षणाख्योविश्वविधारकोभगवन्नामूहः सजीवएवसनत्कुमारस्तज्जीवन्मुक्तत्वेनध्यानार्चनादिकमेलभेत ३५ ॥ ॥ ॥

एवमविद्योपाधिकं जीवमुपपाद्य तस्मादेव जीवात् प्रद्युम्नाख्यं मन उत्पद्यते इत्याह यस्मिन्निति। प्रद्युम्नसंज्ञके मनसि सर्वेषां भूतानां लयो ऐक्योक्त्या नाम संस्कारेषु स्थितिरिति भावः ३६ तस्मात्प्रसूत इति तच्छब्देन संकर्षणः परामृश्यते। तस्मात्सर्वमिति तच्छब्देन प्रद्युम्नः स एव चानिरुद्धाख्योऽहंकारः ३७ एवं त्वंपदार्थम

तस्मात्सनत्कुमारत्वं योलभत्स्वेन कर्मणा यस्मिंश्च सर्वभूतानि प्रलयं यान्ति संक्षये ३६ स मनः सर्वभूतानां प्रद्युम्नः परिपठ्यते तस्मात्प्रसूतो यः कर्ता कारणं कार्यमेव च ३७ तस्मात्सर्वं संभवति जगत्स्थावरजंगमं सोनिरुद्धः स ईशानो व्यक्तः स सर्वकर्मसु यो वासुदेवो भगवान्क्षेत्रज्ञो निर्गुणात्मकः ज्ञेयः स एव राजेन्द्र जीवः संकर्षणः प्रभुः ३८ संकर्षणाच्च प्रद्युम्नो मनोभूतः स उच्यते प्रद्युम्नाद्योनिरुद्धस्तु सोहंकारः स ईश्वरः ३९ मत्तः सर्वं संभवति जगत्स्थावरजंगमं अक्षरं च क्षरं चैव सच्चासच्चैव नारद ४० मां प्रविश्य भवंतीह मुक्ता भक्तास्तु ये मम अहं हि पुरुषो ज्ञेयो निष्क्रियः पंचविंशकः ४१ ॥ ॥ ॥

प्रद्युम्नादिजनकं जीवमुक्त्वा स्वपूर्वोक्तं तत्पदार्थं नामेत्याह यो वासुदेव इति ३८ परमकारणत्वं तस्यैवाह मत्त इति। अक्षरं जीवः क्षरं प्रकृतिमहदहंकारादि सत्कारणं ४० मां प्रविश्येत्युक्तः प्रवेशो न दीपसमुद्रदृष्टांतेन मा भूदिति स्वस्य उपाधिशबलत्वं निराचष्टे अहं हीति पुरुषश्चिन्मात्रः निष्क्रियः कूटस्थः ज्ञेय एव न तु प्राप्यः सर्वभूतप्रत्यगात्मत्वात् ४१

निर्गुणत्वात्सुषुप्ताविव न वासनाशेषवत्त्वप्राप्तिः निष्कलत्वान्न संयोगहत्या अत एव निर्द्वन्द्वः महाकाशघटाकाशयोरिवोपाध्यपगममात्रकृतत्वाद्भेदान्मात्रतर
वत्पाद्यभावाद्वासनादिरूपः परिग्रहोऽपि नास्ति ४१ ननु विश्वरूपस्य तव कथं निष्कलत्वमत आह एतदिति अयं रूपं वा निर्णियत्तरेण न च त्वया न ज्ञातव्यायतोऽहं मु
क्तोऽनन्तशेषपर्यन्तं अदृश्यो नैव यद्रचन्तिति मरीचिमात्रस्य सृष्टिसंहारावित्यर्थः ४२ दृश्यतादि विद्धदर्शोऽपि विश्वरूपत्वं नोपैतीत्याशंक्याह मायेति निष्कलस्य मम

निर्गुणो निष्कलश्चैव निर्द्वन्द्वो निष्परिग्रहः ४१ एतत्स्थानविज्ञेयं रूपं वा नितिरूप्यते इछन्मुक्त्वान्तरेण यमीशोऽहं जगतो गुरुः
४२ मायाह्येषा मया सृष्टा यन्मां पश्यसि नारद सर्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसि ४३ मयैतत्कथितं सम्यक् तव मूर्त्तिचतुष्ट
यं अहं हि जीवसंज्ञातो मयि जीवः समाहितः ४४ नैवं ते बुद्धिरत्राभूद्दृष्टो जीवो मयेति वै अहं सर्वत्रगो ब्रह्मन् भूतग्रामान्तरा
त्मकः ४५ भूतग्रामशरीरेषु नश्यत्सु न नशाम्यहं सिद्धा हि ते महाभागा नरा ह्येकान्तिनोऽभवन् ४६ तमोरजोभ्यां निर्मु
क्ताः प्रवेक्ष्यन्ति च मां मुने हिरण्यगर्भो लोकादिश्चतुर्वक्त्रो निरुक्तगः ४७ ॥ ॥ ॥ ॥ ॥ ॥

स्वरूपमेव मायेत्यर्थः सर्वभूतगुणैः रूपादिभिरेवं प्रकारेण युक्तं मां ज्ञातुं नार्हसि निर्गुणत्वान्ममेत्यर्थः ४३ संज्ञातः जीवत्वेन सम्यक् ज्ञातः पाठान्तरे जीव
स्यापकरणभूतः संघातः जडवर्गोऽप्यहमेव जीवत्वयाधिष्ठानत्वाज्जीवोऽप्यहमेवेति भावः ४४ यतः जडाजडवर्गात्माऽहमेव ततो हेतोस्त्वया स्थूलमाद
ध्यासोपाधिकस्य मम दृष्टिर्जीव एव मया दृष्टः न त्वीश्वर इति न मन्तव्यं जीवादिरूपेणाहमेवावस्थानाद्धिंस्याहं नैवमिति ४५ स्पष्टार्थोऽध्यायशेषः ४७ ॥

ब्रह्मासनातनोदेवोममपूर्वार्थचिंतकः ललाटाच्चैवमेरुद्रोदेवः क्रोधाद्विनिःसृतः ४८ पश्यैकादशमेरुद्रान्दक्षिणंपार्श्वमास्थितान् द्वाद
शैवतथादित्यान्वामपार्श्वंसमास्थितान् ४९ अग्रतश्चैवमेपश्यवसूनष्टौसुरोत्तमान् नासत्यंचैवदस्रंचभिषजौपश्यपृष्ठतः ५० सर्वान्प्रजा
पतीन्पश्यपश्यसप्तऋषींस्तथा वेदान्यज्ञांश्चशतशः पश्यामृतमथौषधीः ५१ तपांसिनियमांश्चैवयमानपिपृथग्विधान् तथाष्टगु
णैश्वर्यमेकस्थंपश्यमूर्त्तिमत् ५२ श्रियंलक्ष्मींचकीर्त्तिंचपृथिवींचककुद्मिनीं वेदानांमातरंपश्यमत्स्थांदेवींसरस्वतीं ५३ ध्रुवंचज्यो
तिषांश्रेष्ठंपश्यनारदखेचरं अंभोधरान्समुद्रांश्चसरांसिसरितस्तथा ५४ मूर्त्तिमंतः पितृगणांश्चतुरः पश्यसत्तम त्रींश्चैवेमान्गुणान्पश्य
मत्स्थान्मूर्त्तिविवर्जितान् ५५ देवकार्यादपिमुनेपितृकार्यंविशिष्यते देवानांचपितृणांचपिताह्येकोहमादितः ५६ अहंहयशि
राभूत्वासमुद्रेपश्चिमोत्तरे पिबामिसुहुतंहव्यंकव्यंचश्रद्धयान्वितं ५७ मयासृष्टः पुराब्रह्मामांयज्ञमयजत्स्वयं ततस्तस्मिन्वरान्प्रीतो
दत्तवानस्म्यनुत्तमान् ५८ मत्पुत्रत्वंचकल्पादौलोकाध्यक्षत्वमेवच अहंकारकृतंचैवनामपर्यायवाचकं ५९ त्वयाकृतांचमर्या
दांनातिक्रंस्यतिकश्चन त्वंचैववरदोब्रह्मन्वरेप्सूनांभविष्यसि ६० सुरासुरगणानांचऋषीणांचतपोधन पितॄणांचमहाभागसततं
६१ संशितव्रत विविधानांचभूतानां ॥

त्वमुपास्यो भविष्यसि ६० प्रादुर्भावगतश्चाहं सुरकार्येषु नित्यदा अनुशास्यस्त्वया ब्रह्मन्नियोज्यश्च सुतो यथा ६१ एतांश्चान्यांश्च रुचिरा
न्ब्रह्मणोमिततेजसे अहं दत्वा वरान्प्रीतो निवृत्तिपरमो भवं ६२ निर्वाणं सर्वधर्माणां निवृत्तिः परमा स्मृता तस्मान्निवृत्तिमापन्नश्चरेत्स
र्वांगनिर्वृतः ६३ विद्यासहायवंतं मां आदित्यस्थं समाहितं कपिलं प्राहुराचार्याः सांख्यनिश्चितनिश्चयाः ६४ हिरण्यगर्भो भगवाने
षछंदसि सुष्टुतः सोहं योगरतिर्ब्रह्मन्योगशास्त्रेषु शब्दितः ६५ एषोहं व्यक्तिमागम्य तिष्ठामि दिवि शाश्वतः ततो युगसहस्रांते संहरि
ष्ये जगत्पुनः ६६ कृत्वात्मस्थानि भूतानि स्थावराणि चराणि च एकाकी विद्यया सार्द्धं विहरिष्येजसुनः ६७ ततो भूयो जगत्सर्वं ग५
करिष्यामीह विद्यया अस्मन्मूर्तिश्चतुर्थी या सासृजच्छेषमव्ययं ६८ स हि संकर्षणः प्रोक्तः प्रद्युम्नं सोप्यजीजनत् प्रद्युम्नादनिरु
द्धोहं सर्गो मम पुनः पुनः ६९ अनिरुद्धात्तथा ब्रह्मा तन्नाभिकमलोद्भवः ब्रह्मणः सर्वभूतानि चराणि स्थावराणि च ७० ए
तां सृष्टिं विजानीहि कल्पादिषु पुनः पुनः यथा सूर्यस्य गगनादुदयास्तमने इह ७१ नष्टे पुनर्बलात्काल आनयत्यमितद्युतिः
तथा बलादहं पृथ्वीं सर्वभूतहिताय वै ७२ सत्वैराक्रांतसर्वांगां नष्टां सागरमेखलां आनयिष्यामि स्वस्थानं वाराहं रूपमास्थितः
७३ हिरण्याक्षं वधिष्यामि दैतेयं बलगर्वितं नारसिंहं वपुः कृत्वा हिरण कशिपुं पुनः ७४ ॥ ॥ ॥ ॥ ॥

मो०
५२१

521

सुरकार्येहनिष्यामियज्ञघ्नंदितिनंदनं विरोचनस्यबलवान्बलिः पुत्रोमहासुरः ७५ अवध्यःसर्वलोकानांसदेवासुररक्षसां भवि
ष्यतिसशक्रंचस्वराज्याच्च्यावयिष्यति ७६ त्रैलोक्येपहृतेतेनविमुखेचशचीपतौ अदित्यांद्वादशादित्यःसंभविष्यामिकश्यपात्
७७ ततोराज्यंप्रदास्यामिशक्रायामिततेजसे देवतास्थापयिष्यामिस्वेषुस्थानेषुनारद ७८ बलिंचैवकरिष्यामिपातालवा
सिनं दानवंचबलिश्रेष्ठमवध्यंसर्वदैवतैः ७९ त्रेतायुगेभविष्यामिरामोभृगुकुलोद्वहः क्षत्रंचोत्सादयिष्यामिसमृद्धबलवाहनः
८० संध्यांशेसमनुप्राप्तेत्रेतायांद्वापरस्यच अहंदाशरथीरामोभविष्यामिजगत्पतिः ८१ त्रितोयघातोद्विरूप्यमेकतोथद्वितस्तथा
प्राप्स्येतेवानरत्वंहिप्रजापतिसुतावृषी ८२ तयोर्येत्वन्वयेजाताभविष्यन्तिवनौकसः महाबलामहावीर्याःशक्रतुल्यपराक्रमाः
ः ८३ तेसहायाभविष्यंतिसुरकार्येममद्विज ततोरक्षःपतिंघोरंपुलस्त्यकुलपांसनं ८४ हनिष्येरावणंरौद्रंसगणंलोककंटकं
द्वापरस्यकलेश्चैवसंधौपर्यवसानिके ८५ प्रादुर्भावःकंसहेतोर्मथुरायांभविष्यति तत्राहंदानवान्हत्वासुबहून्देवकंटकान् ८६
कुशस्थलींकरिष्यामिनिवेशंद्वारकांपुरीं वसानस्तत्रवैपुर्यामदित्याविप्रियंकरं ८७ हनिष्येनरकंभौमंमुरुंपीठंचदानवं प्रा
ग्ज्योतिषपुरंरम्यंनानाधनसमन्वितं ८८ कुशस्थलींनयिष्यामिहत्वावै ॥ ॥ ॥ ॥ ॥ ॥

तत३

गम०
५२१

दानवोत्तमं महेश्वरमहासेनौ बाणप्रियहितैषिणौ ८९ पराजेष्याम्यथोद्युक्तौ देवैर्लोकनमस्कृतौ ततः सुतं बलेर्जित्वा बाणं बाहुसह
स्रिणं ९० विनाशयिष्यामि ततः सर्वान्सौभनिवासिनः यः कालयवनः ख्यातो गर्गतेजोभिसंवृतः ९१ भविष्यति वधस्तस्य मत्त एव द्वि
जोत्तम जरासंधश्च बलवान्सर्वराजविरोधनः ९२ भविष्यत्यसुरस्फीतो भूमिपालो गिरिव्रजे मम बुद्धिपरिस्पंदाद्वधस्तस्य भविष्यति ९३
शिशुपालं वधिष्यामि यज्ञे धर्मसुतस्य वै समागमेषु वलिषु पृथिव्यां सर्वराजसु ९४ वासविः सुसहायो वै मम ह्येको भविष्यति युधिष्ठिरं स्था
पयिष्यामि स्वराज्ये भ्रातृभिः सह ९५ एवं लोका वदिष्यंति नरनारायणावृषी उद्युक्तौ दहतः क्षत्रं लोककार्यार्थमीश्वरौ। ९६ कृत्वा भारावतरणं
वसुधायां यथेप्सितं सर्वसात्वतमुख्यानां द्वारकायाश्च सत्तम ९७ करिष्ये प्रलयं घोरमात्मज्ञानाभिसंवृतं कर्माण्यपरिमेयानि चतुर्मू
र्तिधरो ह्यहं ९८ कृत्वा लोकान्गमिष्यामि स्वानहं ब्रह्मसत्कृतान् हंसः कूर्मश्च मत्स्यश्च प्रादुर्भावा द्विजोत्तम ९९ वाराहो नरसिंहश्च
वामनो राम एवच रामो दाशरथिश्चैव सात्वतः कल्किरेवच १०० यदा वेदश्रुतिर्नष्टा मया प्रत्याहृता पुनः सवेदाः सश्रुतीकाश्च कृताः
पूर्वं कृते युगे १ अतिक्रांताः पुराणेषु श्रुतास्ते यदि वा क्वचित् अतिक्रांताश्च बहवः प्रादुर्भावा ममोत्तमाः २ ॥ ॥ ॥ ॥

लोककार्याणि कृत्वा च पुनः स्वां प्रकृतिं गतः नैषेत दुह्मणा प्राप्तमीदृशं मम दर्शनं ३ यत्त्वया प्राप्तमद्येह एकांतगतबुद्धिना एतत्ते स
र्वमाख्यातं ब्रह्मन्भक्तिमतो मया ४ पुराणं च भविष्यं च सरहस्यं च सत्तम भीष्म उवाच एवं स भगवान्देवो विश्वमूर्तिधरोऽव्ययः एता
वदुक्त्वा वचनं तत्रैवांतरधीयत पुनः ६ नारदोऽपि महातेजाः प्राप्यानुग्रहमीप्सितं नरनारायणौ द्रष्टुं बदर्याश्रममाद्रवत् ७ इदं महोपनि
षदं चतुर्वेदसमन्वितं सांख्ययोगकृतं तेन पंचरात्रानुशब्दितं ८ नारायणमुखोद्गीतं नारदोऽश्रावय [illegible]
त्पुनः ब्रह्मणः सदने तात यथा दृष्टं यथाश्रुतं ९ युधिष्ठिर उवाच एतदाश्चर्यभूतं हि माहात्म्यं तस्य धीमतः किं ब्रह्मा न जानीते यः
शुश्राव नारदात् १० पितामहोऽपि भगवांस्तस्माद्देवादनंतरः कथं स न विजानीयात्प्रभावममितौजसः ११ भीष्म उवाच महाक
ल्पसहस्राणि महाकल्पशतानि च समतीतानि राजेंद्र सर्गाश्च प्रलयाश्च ह १२ सर्गस्यादौ स्मृतो ब्रह्मा प्रजासर्गकरः प्रभुः जाना
ति देवप्रवरं भूयश्चातोऽधिकं नृप परमात्मानमीशानमात्मनः प्रभवं तथा ये त्वन्ये ब्रह्मसदने सिद्धसंघाः समागताः १४ तेभ्यस्तच्छ्रा
वयामास पुराणं वेदसंमितं तेषां सकाशात्सूर्यस्तु श्रुत्वा वै भावितात्मनां १५ आत्मानुगामिनां राजन्श्रावयामास वै ततः षट्षष्टिर्हि
सहस्राणि ऋषीणां भावितात्मनां १६ सूर्यस्य तपतो लोकान्निर्मिता ये पुरःसराः तेषामकथयत्सूर्यः सर्वेषां भाविता ॥ ॥

त्मनां १७ सूर्यानुगामिभिस्तातऋषिभिस्तैर्महात्मभिः मेरौसमागतादेवाः श्राविताश्चेदमुत्तमं १८ देवानांतुसकाशाद्वैततः श्रुत्वासितो
द्विजः श्रावयामासराजेंद्रपितॄणांमुनिसत्तम १९ममचापिपितातातकथयामासशंतनुः ततोमयापिश्रुत्वाचकीर्तितंतवभारत २०
सुरैर्वामुनिभिर्वापिपुराणंयैरिदंश्रुतं सर्वैस्तैःपरमात्मानंपूजयंतेसमंततः २१ इदमाख्यानमार्षेयंपारंपर्यागतंनृप नावासुदेवभक्ताय
त्वयादेयंकथंचन २२ मत्तोन्यानिचतेराजन्नुपाख्यानशतानिवै यानिश्रुतानिसर्वाणितेषांसारोयमुद्धृतः २३ सुरासुरैर्यथाराजन्नि
र्मथ्यामृतमुद्धृतं एवमेतत्पुराविप्रैःकथामृतमिहोद्धृतं २४ यश्चेदंपठतेनित्यंयश्चेदंशृणुयान्नरः एकांतभावोपगतएकांतेसुसमा
हितः २५ प्राप्यश्वेतंमहाद्वीपंभूत्वाचंद्रप्रभोनरः ससहस्रार्चिषंदेवंप्रविशेन्नात्रसंशयः २६ मुच्येदार्तस्तथारोगाच्छ्रुत्वेमामादितः
कथां जिज्ञासुर्लभतेकामान्भक्तोभक्तगतिंव्रजेत २७ त्वयापिसततंराजन्नभ्यर्च्यःपुरुषोत्तमः सहिमातापिताचैवकृत्स्नस्यजग
तोगुरुः २८ ब्रह्मण्यदेवोभगवान्प्रीयतांतेसनातनः युधिष्ठिरमहाबाहोमहाबुद्धिर्जनार्दनः २९ वैशंपायनउवाच श्रुत्वैत
दाख्यानवरंधर्मराड्जनमेजय भ्रातरश्चास्यतेसर्वेनारायणपराभवन् ३० जितंभग ॥ ॥ ॥ ॥ ॥॥

वन्नोत्तनपुरुषेणेतिभारत निसंज्ञप्यपरंब्रह्मसरस्वतीमुदीरयन् ३१ योऽस्माकंगुरुः श्रेष्ठः कृष्णद्वैपायनोमुनिः जगौपरमकंजप्यंनारा
यणमुदीरयन् ३२ गत्वांतरिक्षात्सततंक्षीरोदममृताशयं पूजयित्वाचदेवेशंपुनरायात्स्वमाश्रमं ३३ भीष्मउवाच एतत्तेसर्वमा
ख्यातंनारदोक्तंमयेरितं पारंपर्यागतंह्येतत्पित्रामेकथितंपुरा ३४ सूतउवाच एतत्तेसर्वमाख्यातंवैशंपायनकीर्त्तितं जनमेज
येनतच्छ्रुत्वाकृतंसम्यग्यथाविधि ३५ यूयंहितप्ततपसः सर्वेचचरितव्रताः सर्वेवेदविदोमुख्यानैमिषारण्यवासिनः ३६

२७ शांतापारेति चिंत्यितमः कथं स इति यज्ञधारी यज्ञकृत् एकस्यैव यज्ञभोक्तृत्वं यज्ञकर्तृत्वं च विरुद्धमित्यर्थः तथा परस्परविरुद्धयोः प्रवृत्तिनिवृत्तिधर्मयोः एकस्य शा

शौनकस्य महासत्रे प्राप्ताः सर्वे द्विजोत्तमाः यज्ञभागं सुहुते ते यज्ञैः शाश्वतं परमेश्वरं पारंपर्यागतं ह्येतत्पित्रा मे कथितं पुरा ३० शांतौ मोक्षधर्मेषु नारायणीये शौनक उवाच कथं स भगवान्देवो यज्ञेष्वग्रहरः प्रभुः यज्ञधारी च सततं वेदवेदांगवित्तथा १ निवृत्तं चास्थितो धर्मं क्षेमी भागवतः प्रभुः निवृत्तिधर्मान्विदधे स एव भगवान्प्रभुः २ कथं प्रवृत्तिधर्मेषु भागार्हा देवताः कृताः कथं निवृत्तिधर्माश्च कृता व्यावृत्तबुद्धयः ३ एतं नः संशयं सौते छिंधि गुह्यं सनातनं त्वया नारायणकथा श्रुता वै धर्मसंहिता ४ सौतिरुवाच जनमेजयेन यत्पृष्टः शिष्यो व्यासस्य धीमतः तत्तेहं कथयिष्यामि पौराणं शौनकोत्तम ५ श्रुत्वा माहात्म्यमेतस्य देहिनां परमात्मनः जनमेजयो महाप्राज्ञो वैशंपायनमब्रवीत् ६ जनमेजय उवाच इमे सब्रह्मका लोकाः ससुरासुरमानवाः क्रियास्वभ्युदयोक्तासु सक्ता दृश्यंति सर्वशः ७ मोक्षश्चोक्तस्त्वया ब्रह्मन्निर्वाणं परमं सुखं ये तु मुक्ता भवंतीह पुण्यपापविवर्जिताः ८ ते सहस्रार्चिषं देवं प्रविशंतीह शुश्रुम अहो हि दुरनुष्ठेयो मोक्षधर्मः सनातनः ९ यं हित्वा देवताः सर्वा हव्यकव्यभुजोभवन् किं च ब्रह्मा च रुद्रश्च शक्रश्च बलभित्प्रभुः १० ॥ ॥ ॥ ॥

(margin: ध्रता: ३)

स्त्रत्वं विरुद्धं प्रतारकत्वापत्तेरिति प्रश्नार्थः क्षेमीन जीवशब्दो रमेश्वरत्वमिति पक्षे यथा निवृत्तिधर्मश्चावेक्ष्य प्रवृत्तिश्चेयं ४ देहिनां परमात्मनः अंतरात्मनः ८ सहस्रा चिषं सूर्यांतर्यामिणं त्वं नं तच्चिद्रूपं वा ९

मो०
५२४

524

यद्यपि निवृत्तिधर्मः श्रेयान्तथापि तद्विषये संदेह इत्याह जगत्त्रये त्र्यधिकं ज्ञानं तेऽपि ब्रह्मरुद्रादयः सृष्टिसंहारादौ न प्रवर्तेरन् अतः प्रतारणमात्रं निवृत्तिधर्म इत्यर्थः

सूर्यस्ताराधिपो वायुरग्निर्वरुण एव च आकाशं जगती चैव ये च शेषा दिवौकसः ११ प्रलयं न विजानन्ति आत्मनः परिनिर्मितं ततस्ते नास्थिता मार्गं ध्रुवमक्षरमव्ययं १२ ख्यातिकालपरीमाणं प्रवृत्तिं ये समास्थिताः दोषः कालपरीमाणे महानेष क्रियावतां १३ एतन्मे संशयं विप्र हृदि शल्यमिवार्पितं छिंधीतिहासकथनात्परं कौतूहलं हि मे १४ कथं भागहराः प्रोक्ता देवताः क्रतुषु द्विज किमर्थं चाध्वरे ब्रह्मन्निज्यन्ते त्रिदिवौकसः १५ ये च भागं प्रगृह्णन्ति यज्ञेषु द्विजसत्तम ते यजन्तो महायज्ञैः कस्य भागं ददन्ति वै १६ वैशंपायन उवाच अहो गूढतमः प्रश्नस्त्वया पृष्टो जनेश्वर नातप्ततपसा ह्येष नावेदविदुषा तथा १७ नापुराणविदा चैव शक्यो व्याहर्तुमञ्जसा हन्त ते कथयिष्यामि यन्मे पृष्टः पुरा गुरुः १८ कृष्णद्वैपायनो व्यासो वेदव्यासो महानृषिः सुमन्तुर्जैमिनिश्चैव पैलश्च सुदृढव्रतः १९ अहं चतुर्थः शिष्यो वै पञ्चमश्च शुकः स्मृतः ए तान्समागतान्सर्वान्पञ्च शिष्यान्दमान्वितान् २० शौचाचारसमायुक्तान्जितक्रोधान्जितेन्द्रियान् वेदानध्यापयामास महाभारतपञ्चमान् २१ मेरौ गिरिवरे रम्ये सिद्धचारणसेविते तेषामभ्यस्यतां वेदान्कदाचित्संशयोऽभवत् २२ ॥ ॥

अथ कथमिति यथा देवाः देवान्तराभावात् इतरेभ्यो भागमदत्वा स्वयं तु स्वेनैव ते स्वं वयमपि स्वस्यास्मीति प्रवृत्तिमार्गोऽप्याक्षेप्तः १६

५१

१४ मयेति आत्मानुमानाभ्यां परोक्षे प्राग्गृहीते तीर्थयोगिनां प्रत्यक्षः अन्ते योगजप्रत्यक्षं प्रकृते योक्तं योगभाष्येन तत्त्वं प्रत्यक्षेन च कृतानुमानयोर्वीजमिति यागसिद्धभावि तुम्यागमगम्य एवायमर्थः इत्याशयः २० परमात्मनः प्रतिबिंबभूतं परमात्मानं येन रूपेण महीवक्त्रः तेनैतेन रूपेण स्वयं पूजायत्नमा गादिरूपालब्धवंतः यथोक्तं भागवते यद्यज्जनो भगवते विदधीत मानं तच्चात्मनः प्रतिमुखस्य यथा मुखश्रीरिति। अतः फलावस्थायां स्वयं अर्कुर्वंतो

एवमेव यस्त्वया दृष्टस्तेनेनेत्थं प्रकीर्तितः ततः कृतो मया चापि तत्वाख्ये पाद्मभारत २३ शिष्याणां वचनं श्रुत्वा सर्वज्ञानन्त मोमुद्रः पराशरसुतः श्रीमान्व्यासो वाक्यमथाब्रवीत् २४ मया हि सुमहत्तप्तं तपः परमदारुणं भूतं भव्यं भविष्यं च जानीयामिति सत्तमाः २५ तस्य मे तप्ततपसो निगृहीतेंद्रियस्य च नारायणप्रसादेन क्षीरोदस्यानुकूलतः २६ त्रैकालिकमिदं ज्ञानं प्रादुर्भूतं तत्तथेप्सितं तच्छृणुध्वं यथान्यायं वक्ष्ये संशयमुत्तमं २७ यथा दृष्टं हि कल्पादौ दृष्टमेतज्ज्ञानचक्षुषा परमात्मेति यं प्राहुः सांख्ययोगविदो जनाः २८ महापुरुषसंज्ञां स लभते स्वेन कर्मणा तस्मात्प्रसूतमव्यक्तं प्रधानं तं विदुर्बुधाः २९

पिद्वा अस्मदन्नात्मन्नभागानभुंजते। अस्माकं चैतेभ्यः प्रदानेन महादोषः इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः इति गीतावचनात् अतः प्रवृत्तिमार्गो विष्णपमनुसरणीय इत्याह परमात्मेति यं प्राहुरित्यादिना सनःसन त्सुजातश्चेसतः प्राक्तेनेनग्रंथेन २८ २९

अव्यक्ताद्व्यक्तमुत्पन्नंलोकसृष्ट्यर्थमीश्वरात् अनिरुद्धोहिलोकेषुमहानात्मेतिकथ्यते ३० योसौव्यक्तित्वमापन्नोनिर्ममेचपि
तामहं सोहंकारइतिप्रोक्तः सर्वतेजोमयोहिसः ३१ पृथिवीवायुराकाशमापोज्योतिश्चपंचमं अहंकारप्रसूतानिमहाभूतानि
पंचधा ३२ महाभूतानिसृष्ट्वैवतद्गुणान्निर्ममेपुनः मूर्तेभ्यश्चैवनिष्पन्नामूर्तिमंतश्चतांछृणु ३३ मरीचिरंगिराश्चात्रिः
पुलस्त्यः पुलहः क्रतुः वसिष्ठश्चमहात्मावैमनुः स्वायंभुवस्तथा ३४ ज्ञेयाः प्रकृतयोष्टौतायासुलोकाः प्रतिष्ठिताः वेदान्वेदांग
संयुक्तान्यज्ञान्यज्ञांगसंयुतान् ३५ निर्ममेलोकसिद्ध्यर्थंब्रह्मालोकपितामहः अष्टाभ्यः प्रकृतिभ्यश्चजातंविश्वमिदंजगत्
रुद्रोरोषात्मकोजातोदशान्यान्सोसृजत्स्वयं एकादशैतेरुद्रास्तुविकारपुरुषास्मृताः ३७ तेरुद्राः प्रकृतिश्चैवसर्वेचैवसुर
र्षयः उत्पन्नालोकसिध्यर्थंब्रह्माणंसमुपस्थिताः ३८ वयंसृष्टाहिभगवंस्त्वयाचप्रभविष्णुना येनयस्मिन्नधीकारेवर्तित
व्यंपितामह ३९ योसौत्वयाभिनिर्दिष्टोह्यधिकारोर्थचिंतकः परिपाल्यः कथंतेनसोहंकारेणकर्तृणा ४० प्रदिशत्वंबलं
तस्ययोधिकारार्थचिंतकः एवमुक्तोमहादेवोदेवांस्तानिदमब्रवीत् ४१ ब्रह्मोवाच साध्वहंज्ञापितोदेवायुष्माभिर्भद्रमस्तु
वः ममाप्येषासमुत्पन्नाचिंतायाभवतांमता ४२ लोकत्रयस्यकृत्स्नस्यकथंकार्यःपरिग्रहः कथंबलक्षयोनस्याद्युष्मा
कंह्यात्मनश्चमे ४३ इतः ॥

सर्वेपिगछाम: शरणंलोकसाक्षिणं महापुरुषमव्यक्तंसनोवक्ष्यतियद्धितं ४४ ततस्तेब्रह्मणासार्द्धमृषयोविबुधास्तथा क्षीरोदस्यो
त्तरंकूलंजग्मुर्लोकहितार्थिन: ४५ तेतप: समुपातिष्ठन्ब्रह्मोक्तंवेदकल्पितं समहानियमोनामतपश्चर्यासुदारुण: ४६ ऊर्ध्वदृष्टि
र्बाहवश्चएकाग्रंचमनोभवत् एकपादास्थिता: सर्वेकाष्ठभूता: समाहिता: ४७ दिव्यंवर्षसहस्रंतेतपस्तप्त्वासुदारुणं शुश्रुवुर्मधु
रांवाणींवेदवेदांगभूषितां ४८ श्रीभगवानुवाच भोभो: सब्रह्मकादेवाऋषयश्चतपोधना: स्वागतेनार्च्यव: सर्वान्श्रावयेवा
क्यमुत्तमं ४९ विज्ञातंवोमयाकार्यंतच्चलोकहितंमहत् प्रवृत्तियुक्तंकर्तव्यंयुष्मत्प्राणापबृंहणं ५० सुतप्तंचतपोदेवाममा
राधनकाम्यया भोक्ष्यथास्यमहासत्वास्तपस: फलमुत्तमं ५१ एषब्रह्मालोकगुरुर्महान्लोकपितामह: यूयंचविबुधश्रे
ष्ठामांयजध्वंसमाहिता: ५२ सर्वेभागान्कल्पयध्वंयज्ञेषुममनित्यश: तथाश्रेयोभिधास्यामियथाधीकारमीश्वरा: ५३
वैशंपायनउवाच श्रुत्वैतद्देवदेवस्यवाक्यंहृष्टतनूरुहा: ततस्तेविबुधा: सर्वेब्रह्मातेचमहर्षय: ५५ वेददृष्टेनविधिनावैष्ण
वंक्रतुमाहरन् तस्मिन्सत्रेसदाब्रह्मास्वयंभागमकल्पयत् ५६ देवादेवर्षयश्चैवसर्वेस्वंभागमकल्पयन् तेकार्तयुगधर्माणो
भागा: परमसत्कृता: ५७ प्रापुरादित्यवर्णंतंपुरुषंतमस: परं बृहंतंसर्वगंदेवमीशानंवरदंप्रभुं ५८ ततोथवरदोदेव
स्तान्सर्वानमरान्स्थितान् अशरीरोबभाषेदंवाक्यंखस्थो

नृ

महेश्वरः ५९ येनयः कल्पितोभागः सतथामामुपागतः प्रीतोहंप्रदिशाम्यग्र्यफलमावृत्तिलक्षणं ६० एतद्वोलक्षणंदेवामत्प्रसा
दसमुद्भवं स्वयंयज्ञैर्यजमानाः समाप्तवरदक्षिणैः ६१ युगेयुगेभविष्यध्वंप्रवृत्तिफलभागिनः यज्ञैर्येचापियक्ष्यंतिसर्वलोके
षुवैसुराः ६२ कल्पयिष्यंतिवोभागांस्तेनरावेदकल्पितान् योमेयथाकल्पितवान्भागमस्मिन्महाक्रतौ ६३ सतथायज्ञभा
गार्होवेदसूत्रेमयाकृतः यूयंलोकान्भावयध्वंयज्ञभागफलोचिताः ६४ सर्वार्थचिंतकालोकेयथाधीकारनिर्मिताः याः क्रिया
प्रचरिष्यंतिप्रवृत्तिफलसत्कृताः ६५ आभिराप्यायितबलालोकान्वैधारयिष्यथ यूयंहिभाविताःसर्वैः सर्वयज्ञेषुमानवैः ६६
मांततोभावयिष्यध्वंमेषावोभावनामम इत्यर्थंनिर्मितावेदायज्ञाश्चौषधिभिः सह ६७ ६७ ६७ ॥

७१ एवंत्रतः प्रधानानां प्रवृत्तिमार्गमुक्त्वा सत्वप्रधानानां योग्यं निवृत्तिमार्गमाह सनइति ७४ कुतएवं मार्गभेदोधिकारिभेदस्वेत्साशंक्याह यतोहमिति त्र
हंकारः यतस्त्रिगुणस्सात्विकोराजसस्तामसश्चातः सृष्टिं त्रिविधजानां येः तत्र सात्विकास्ते धर्मज्ञानवैराग्यैश्वर्यवत्वेन त्रहंकारात्परं क्षेत्रज्ञं संहा

एभिः सम्यक्प्रयुक्तैर्हि प्रीयन्ते देवताः क्षितौ निर्मितोऽहं त्वयुष्माकं प्रवृत्तिगुणकल्पितः ६८ मयाकृतं सुरश्रेष्ठा यावत्कल्प
क्षयादिह चिंतयध्वं लोकहितं यथाधीकारमीश्वराः ६९ मरीचिरंगिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः वसिष्ठइति स
प्तैते मानसा निर्मिता हि ते ७० एते वेदविदो मुख्या वेदाचार्याश्च कल्पिताः प्रवृत्तिधर्मिणश्चैव प्राजापत्ये च कल्पिताः ।
७१ अयं क्रियावतां पंथा व्यक्तीभूतः सनातनः अनिरुद्ध इति प्रोक्तो लोक [illegible] सर्गकरः प्रभुः ७२ स
नः सनत्सुजातश्च सनकः ससनंदनः सनत्कुमारः कपिलः सप्तमश्च सनातनः सप्तैते मानसाः प्रोक्ता ऋषयो ब्रह्मणः
सुताः स्वयमागतविज्ञाना निवृत्तिं धर्ममास्थिताः ७३ एते योगविदो मुख्याः सांख्यज्ञानविशारदाः आचार्या धर्मशा
स्त्रेषु मोक्षधर्मप्रवर्त्तकाः ७४ यतोहं प्रसृतः पूर्वमव्यक्तात्त्रिगुणो महान् तस्मात्परतरो योऽसौ क्षेत्रज्ञ इति कल्पितः ७५

रक्तेनेराप्रविशंति ये राजसास्तेऽहंकारात्पराचीनमेव बाह्यदिकं पुरुषार्थत्वेन पश्यंतः अज्ञानाविधिकेपंतइत्यर्थः ७५ ७५

सोहमितिसोहंनिवृत्तिमार्गरूपः आत्मनिकीनिवृत्तिरात्ममात्रावशेषमेवेति आत्मैवनिवृत्तिरूपः पंथाः सक्रियावतां [illegible]

भि ४

सोहंक्रियावतांपंथाःपुनरावृत्तिदुर्लभः योयथानिर्मितंजंतुर्यस्मिन्यस्मिंश्चकर्मणि ७६ प्रवृत्तौवानिवृत्तौवातत्फलंसोश्नुतेम
हत् एषलोकगुरुर्ब्रह्माजगदादिकरःप्रभुः ७७ एषमातापिताचैवयुष्माकंचपितामहः मयानुशिष्टोभवितासर्वभूतवर
प्रदः ७८ अस्यचैवात्मजोरुद्रोललाटाद्यःसमुत्थितः ब्रह्मानुशिष्टोभवितासर्वभूतधरःप्रभुः ७९ गच्छध्वंस्वानधीकारान्नचि
न्तयध्वंयथाविधि प्रवर्त्तंतांक्रियाःसर्वाःसर्वलोकेषुमाचिरं ८० प्रदिश्यंतांचकर्माणिप्राणिनांगतयस्तथा परिनिष्ठितका
लानिआयूंषीहसुरोत्तमाः ८१ इदंकृतयुगंनामकालःश्रेष्ठःप्रवर्त्तितः अहिंस्यायज्ञपशवोयुगेस्मिन्नतदन्यथा ८२
चतुष्पात्सकलोधर्मोभविष्यत्यत्रवैसुराः ततस्त्रेतायुगंनामत्रयीयत्रभविष्यति ८३ प्रोक्षितायत्रपशवोवधंप्राप्स्यंतिवै
मखे यत्रपादश्चतुर्थोवैधर्मस्यनभविष्यति ८४ ततोवैद्वापरंनाममिश्रःकालोभविष्यति द्विपादहीनोधर्मश्चयुगेतस्मि
न्भविष्यति ८५ ततस्तिष्येथसंप्राप्तेयुगेकलिपुरस्कृते एकपादस्थितोधर्मोयत्रतत्रभविष्यति ८६ देवादेवर्षयश्चो
चुस्तमेवंवादिनंगुरुं एकपादस्थितेधर्मेयत्रक्वचनगामिनि कथंकर्त्तव्यमस्माभिर्भगवंस्तद्वदस्वनः ८७ ॥ ॥

[illegible]ः पुनरावृत्तिमतांदुर्लभः पुनरावृत्तिदुर्लभः मध्यमपदलोपीसमासः ७ मार्गद्वैविध्यादिकमुपसंहरतियोयथेति ७६ एषलोकगुरुरित्यादिस्पष्टार्थः ८१
८६ ८७

८० एवमुक्तस्तादि व्यासवाक्यं ८८ प्रश्नानां क्रमेणोत्तराण्युक्त्वोपसंहरति। एवमेव जरत्यादिना ९९ १००

श्रीभगवानुवाच यत्रैव देवा यज्ञाश्च तपः सत्यं दमस्तथा अहिंसाधर्मसंयुक्ताः प्रचरेयुः सुरोत्तमाः स वो देशः सेवित
व्यो मा वो धर्मः पदास्पृशेत् ८८ व्यास उवाच ततोऽनुशिष्टा भगवता देवाः सर्षिगणास्तथा नमस्कृत्वा भगवते जग्मुर्देशा
न्यथेप्सितान् ८९ गतेषु त्रिदिवौकःसु ब्रह्मैकः पर्यवस्थितः दिदृक्षुर्भगवन्तं तमनिरुद्धतनौ स्थितं ९० तं देवो द
र्शयामास कृत्वा हयशिरो महत् सांगानावर्त्तयन्वेदान् कमण्डलुत्रिदण्डधृक् ९१ ततोऽश्वशिरसं दृष्ट्वा तं देवममितौज
सं लोककर्त्ता प्रभुर्ब्रह्मा लोकानां हितकाम्यया ९२ मूर्ध्ना प्रणम्य वरदं तस्थौ प्राञ्जलिरग्रतः स परिष्वज्य देवेन वचनं
श्रावितस्तदा ९३ भगवानुवाच लोककार्यगतीः सर्वास्त्वं चिंतय यथाविधि धाता त्वं सर्वभूतानां त्वं प्रभुर्जगतो गुरुः
त्वय्यावेशितभारोऽहं धृतिं प्राप्स्याम्यथाञ्जसा ९४ यदा च सुरकार्यं ते अविषह्यं भविष्यति प्रादुर्भावं गमिष्यामि तदात्म
ज्ञानदेशिकं ९५ एवमुक्त्वा हयशिरास्तत्रैवान्तरधीयत तेनानुशिष्टो ब्रह्मापि स्वं लोकमचिराद्गतः ९६ एवमेष महाभा
ग पद्मनाभः सनातनः यज्ञेष्वग्रहरः प्रोक्तो यज्ञधारी च नित्यदा ९७ निवृत्तिं चास्थितो धर्मं गतिमक्षयधर्मिणां प्रवृत्ति
धर्मान्विदधे कृत्वा लोकस्य चित्रतां १०० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भक्त्यातिशयया ब्रह्मन्नस्तुवन्नस्मत्तं परमात्मानं स्तौतीति स श्रीरिति धाता दधाति धारयति पोषयति तद्यो धेयं धारणीयं येयोवर्णीयं च १ नाम्नां निर्वचनं तु स्वयमेव।

सआदिःसमध्यःसचांतःप्रजानांसधातासधेयःसकर्त्तासकार्यं युगांतेप्रसुप्तःसुसंक्षिप्यलोकान्युगादौप्रबुद्धोजगद्ध्युत्ससर्ज
१ तस्मैनमध्वंदेवायनिर्गुणायगुणात्मने अजायविश्वरूपायधाम्नेसर्वदिवौकसां २ महाभूताधिपतयेरुद्राणांपतयेतथा
आदित्यपतयेचैववसूनांपतयेतथा ३ अश्विभ्यांपतयेचैवमरुतांपतयेतथा वेदयज्ञाधिपतयेवेदांगपतयेपिच ४ समुद्र
वासिनेनित्यंहरयेमुंजकेशिने शांतायसर्वभूतानांमोक्षधर्मानुभाषिणे ५ तपसांतेजसांचैवपतयेयशसामपि वाचस्पतयेनित्यंसरितांप
तयेनित्यंसरितांपतयेतथा ६ कपर्दिनेवराहायएकशृंगायधीमते विवस्वतेऽश्वशिरसेचतुर्मूर्तिधृतेसदा ७ गुह्यायज्ञा
नदृश्यायअक्षरायक्षरायच एषदेवःसंचरतिसर्वत्रगतिरव्ययः ८ एषवेदपरंब्रह्मज्ञेयोविज्ञानचक्षुषा एवमेत
त्पुरादृष्टंमयोवैज्ञानचक्षुषा ९ कथितंतच्चवैसर्वंमयापृष्टेनतत्त्वतः क्रियतांमद्वचःशिष्याःसेव्यतांहरिरीश्वरः
१० गीयतांवेदशब्दैश्चपूज्यतांचयथाविधि वैशंपायनउवाच इत्युक्तास्तुवयंतेनवेदव्यासेनधीमता सर्वेशिष्याः
सुतश्चास्यशुकः परमधर्मवित् १२ सचास्माकमुपाध्यायः सहास्माभिर्विशांपते चतुर्वेदोद्गताभिस्तमृग्भिःस
मभितुष्टुवे १३ ॥ ॥ ॥

करोत्यतीतिनत्याख्यायंते २ ३ ३ ३ ३ ३ ३ ३ ३

२१ अध्यायःनिरुक्तनिर्वचनं १ गुणकर्मजगुणाःसर्वज्ञत्वादिःतज्ज्ञकर्मजगत्सृष्ट्यादितज्ज्ञं २ ४ ॥ ॥

एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि एवंमेकथयद्राजन्पुराद्वैपायनोगुरुः १४ यश्चेदंशृणुयान्नित्यंयश्चैवंपरिकीर्त्तयेत् न
मोभगवतेकृत्वासमाहितमतिर्नरः १५ भवत्यरोगोमतिमान्बलरूपसमन्वितः आतुरोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् १६
शामारु ३ कामीलभेत्कामंदीर्घंचायुरवाप्नुयात् ब्राह्मणःसर्ववेदीस्यात्क्षत्रियोविजयीभवेत् १७ वैश्योविपुललाभःस्याच्छूद्रःसुखम
वाप्नुयात् अपुत्रोलभतेपुत्रंकन्याचैवेप्सितंपतिं लग्नगर्भाविमुच्येतगर्भिणीजनयेत्सुतं १८ वंध्याप्रसवमाप्नोतिपुत्रपौत्रस
मृद्धिमत् क्षेमेणगच्छेदध्वानमिदंयःपठतेपथि १९ योयंकामंकामयतेसतमाप्नोतिचध्रुवं ॥ इदंमहर्षेर्वचनंविनिश्चितं
महात्मनःपुरुषवरस्यकीर्त्तनं समागमंचर्षिदिवौकसामिमंनिशम्यभक्ताःसुसुखंलभंते १२१ शांतौमोक्षधर्मेषुनारायणी
ये जनमेजयउवाच अस्तौषीद्यैरिमंव्यासःसशिष्योमधुसूदनं नामभिर्विविधैरेषांनिरुक्तंभगवन्मम १ वक्तुमर्हसिशु
श्रूषोःप्रजापतिपतेर्हरेः श्रुत्वाभवेयंयत्पूतःशरच्चंद्रइवामलः २ वैशंपायनउवाच शृणुराजन्यथाचष्टफाल्गुनस्यहरिः
प्रभुः प्रसन्नात्मात्मनोनाम्नांनिरुक्तंगुणकर्मजं ३ नामभिःकीर्त्तितैस्तस्यकेशवस्यमहात्मनः पृष्टवान्केशवंराजन्फा
ल्गुनःपरवीरहा ४ ॥ ॥

१२ अष्टादशगुणांस्तत्वे प्रीतिः प्रकाशमुद्रेकोलघुतासुखमेवच। अकार्पण्यमसंरंभः संतोषः श्रद्दधानता क्षमाधृतिरहिंसाचशौचमक्रोधएवचआर्जवंसमतासत्य
मनसूयातथैवचेतितत्वगुणोपाधिः श्रीरस्यांदृश्यतेतिभवतीतिगौणनामनिर्वचनं।साष्टादशगुणामयीमह्यंममपराप्रकृतिः स्वरूपंरोदसीद्यावापृथिव्यात्मिकाया

अर्जुनउवाच भगवन्भूतभव्येशसर्वभूतसृगव्यय लोकधामजगन्नाथलोकानामभयप्रद ५ यानिनामानितेदेवकीर्त्तितानिम
हर्षिभिः वेदेषुसपुराणेषुयानिगुह्यानिकर्मभिः ६ तेषांनिरुक्तंत्वत्तोहंश्रोतुमिच्छामिकेशव नह्यन्योवर्णयेन्नाम्नांनिरुक्तंत्वामृ
तेप्रभो ७ श्रीभगवानुवाच ऋग्वेदेसयजुर्वेदेतथैवाथर्वसामसु पुराणेसोपनिषदेतथैवज्योतिषेर्जुन ८ सांख्येचयोगशा
स्त्रेचआयुर्वेदेतथैवच बहूनिममनामानिकीर्त्तितानिमहर्षिभिः ९ गौणानितत्रनामानिकर्मजानिचकानिचित् निरुक्तंक
र्मजानांत्वंशृणुष्वप्रयतोनघ १० कथ्यमानंमयातातत्वंहिमेर्द्धंस्मृतःपुरा नमोतियशसेतस्मैदेहिनांपरमात्मने ११ ना
रायणायविश्वायनिर्गुणायगुणात्मने यस्यप्रसादजोब्रह्मारुद्रश्चक्रोधसंभवः १२ योसौयोनिर्हिसर्वस्यस्थावरस्यचर
स्यच अष्टादशगुणंयत्तत्सत्वंसत्ववतांवर १३ प्रकृतिःसापरामह्यंरोदसीयोगधारिणी ऋतासत्यामराजय्यालोका
नामात्मसंज्ञिता तस्मात्सर्वाःप्रवर्त्तन्तेसर्गप्रलययविक्रियाः १४

गतलोकानधारयतीतियोगधारिणी १२ ऋताकर्मफलभूतात्रह्मलोकांतासत्याअबाधितचिन्मात्ररूपातस्मात्ऋताद्यात्मिकात्परमात्मनएवसत्तास्ततात्त्वात्ते १४

तपश्चादिरूपोऽनिरुद्ध एव १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ ॥

तपोयुक्तस्य यष्टा च पुराणः पुरुषो विराट् अनिरुद्ध इति प्रोक्तो लोकानां प्रभवाव्ययः १५ ब्राह्मे रात्रिक्षये प्राप्ते तस्य ह्यमिततेजसः प्रसा
दात्प्रादुरभवत्पद्मं पद्मनिभेक्षण १६ ततो ब्रह्मा समभवत्स तस्यैव प्रसादजः अह्नः क्षये ललाटाच्च सुतो देवस्य वै तथा १७ क्रोधा
विष्टस्य संजज्ञे रुद्रः संहारकारकः एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजावुभौ १८ तदादेशितपंथानौ सृष्टिसंहारकारकौ निमित्तमा
त्रं तावत्र सर्वप्राणिवरप्रदौ १९ कपर्दी जटिलो मुंडः श्मशानगृहसेवकः उग्रव्रतचरो रुद्रो योगी परमदारुणः २० दक्षक्रतुह
रश्चैव भगनेत्रहरस्तथा नारायणात्मको ज्ञेयः पांडवेय युगे युगे २१ तस्मिन्हि पूज्यमाने वै देवदेवे महेश्वरे संपूजितो भवेत्पार्थ
देवो नारायणः प्रभुः २२ अहमात्मा हि लोकानां विश्वानां पांडुनंदन तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहं २३ यद्यहं नार्च
येयं वै ईशानं वरदं शिवं आत्मानं नार्चयेत्कश्चिदिति मे भावितात्मनः २४ मया प्रमाणं हि कृतं लोकः समनुवर्त्तते प्रमाणा
नि हि पूज्यानि ततस्तं पूजयाम्यहं २५ यस्तं वेत्ति स मां वेत्ति यो नु तं स हि मामनु रुद्रो नारायणश्चैव सत्त्वमेकं द्विधाकृतं २६
लोके चरति कौंतेय व्यक्तिस्थं सर्वकर्मसु न हि मे केन चिद्देयो वरः पांडवनंदन २७ ॥ ॥ ॥

मो०
५३०

538

३३ चतुर्विधाः आर्तो जिज्ञासुरर्थार्थी ज्ञानी चेति गीतोक्ताः अन्या या आत्मातिरिक्ता देवता सा यस्य सोऽन्यदेवतः न यस्य सोऽनन्यदेवताः अथ ये अन्यां देवतामनुपासते स्यो सावान्योऽहमस्मीति न स वेद

इति संचिन्त्य मनसा पुराणं रुद्रमीश्वरं पुत्रार्थमाराधितवानहमात्मानमात्मना २८ नहि विष्णुः प्रणमति कस्मैचिद्विबुधाय च ऋते आत्मानमेवेति ततो रुद्रं भजाम्यहं २९ सब्रह्मकाः सरुद्राश्च सेन्द्रा देवाः महर्षिभिः अर्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिं ३० भविष्यतां वर्तता च भूतानां चैव भारत सर्वेषामग्रणीर्विष्णुः सेव्यः पूज्यश्च नित्यशः ३१ नमस्व हव्यदं विष्णुं तथा शरणदं नमस्व वरदं नमस्व कौंतेय हव्यकव्यभुजं नम ३२ चतुर्विधा मम जना भक्ता एवं हि मे श्रुतं तेषामेकांतिनः श्रेष्ठा ये चैवानन्यदेवताः ३३ अहमेव गतिस्तेषां निराशीःकर्मकारिणां ये च शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ३४ सर्वे च्यवनधर्माणस्ते प्रतिबुद्धस्तु श्रेष्ठभाक् ब्रह्माणं शितिकंठं च याश्चान्या देवताः स्मृताः ३५ प्रबुद्धचर्याः सेवंतो मामेवैष्यंति यत्परं भक्तं प्रति विशेषस्ते एष पार्थानुकीर्तितः ३६ त्वं चैवाहं च कौंतेय नरनारायणौ स्मृतौ भारावतरणार्थं तु प्रविष्टौ मानुषीं तनुं ३७ जानाम्यध्यात्मयोगांश्च योऽहं यस्माच्च भारत निवृत्तिलक्षणो धर्मस्तथाभ्युदयिकोऽपि च ३८ ॥ ॥ ॥ ॥ ॥ ॥

द्रष्टव्या पशुरेवं स देवानामिति श्रुत्योपास्तिनिंदितात्र अनन्योऽसौ देवता यस्यान्ते आत्मैव सेव्या पासीनेत्याद्युक्ते तेन ज्ञानिन इत्यर्थः ३३ ३८ ॥ ॥

एम०
५३०

प्रतिज्ञातं नाम निर्वचनं करोति नराणामित्यादिना । नरा जीवाः बिंबप्रतिबिंबमिव यत्राध्यस्ता अतस्तेषामयनं नारायणः स्तोऽर्थे तद्धिन इत्येकोऽर्थः सूर्यरश्मि
द्वितीयमाह यथा रविरश्मिवत्प्रतिस्रोतः प्रवृत्तेनेय नरश्मिभिः ग्रीवास्थमेव सुखं पूर्वं प्रवृत्तानारकं लोकारात् प्रत्यक्षुरवत्तादुपाधिधर्मविशिष्टं हरं होते अन्यथा त
तानेनुभूतपुरुषादिदर्शनं दृश्येरोन स्यात् तद्विषयकसंस्काराभावात् योपरस्परोगाहष्टः सत्यवाप्यमित्यवाधितप्रत्यभिज्ञाबलाच्च न दृश्यते ऽभिनवमुख्याध्यास इति सूत्रादि
तेवेदान्तकतर्कैस्माभिः क्रतिशब्दे रूजीवयोर्बिंबप्रतिबिंबभावः दृश्यते । यथाह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् । उपाधिना क्रियते भेद

नराणामयनं ख्यातमहमेकः सनातनः आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं मम तत्पूर्वमतो नारायणो
ह्यहं ३९ छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः सर्वभूताधिवासश्च वासुदेवस्ततो ह्यहं ४० ४० ॥ ॥

सूर्यो रवः क्षेत्रेष्वेवमेजोऽप्यमात्मेति । तस्माद्बिंबं चैचैतन्यमेव ख्यातस्य जीवाख्यप्रतिबिंबस्याविद्यादर्पणापनयेन तत्रैव विलय इति युक्तं तस्य नारायणत्वं निर्वचनं । तस्मा
द्धा नरो जीवः तदविद्याकल्पितं त्वं बुप्रधानत्वात् आपः पुरुषं च सोमवंतीति श्रुतेश्चायमिति शरीरमुच्यते । नरस्य पूर्वं अयनं प्रवेशस्थानं उपाधिसृष्टिसमकालीनं हि
घटाकाशवदुपाधौ चित्तेः प्रवेशः उपाध्यभिमानानंतरं च जीवत्वमिति विवेकः अत उक्तं मम तत्पूर्वमयनमिति ३९ वासयत्याच्छादयति विश्वं च सत्त्वास्मिन्निवसु
मितिवा वासुः वसत्याच्छादनेन वसतिनिवासे इत्यनयोः संपसचासौ देवश्चेति वासुदेवश्चेत्यर्थः ऐतेन इशावास्यमिदं सर्वं एकमोध्यक्षः सर्वभूताधिवास इति श्लोकार्थः
वरु : संगृहीतः ४० ॥ ॥ ॥

मो०
५३१

531

विछ्लृ गतौ जुहोत्यादिः विछ दीप्तौ चुरादिः विष्लृ व्याप्तौ जुहोत्यादिः विषु सेचने भ्वादिः विश प्रवेशने तुदादिः ष्णु प्रस्रवणे तुदादिः एतेषामन्यतमस्य रूपं विष्णुरिति अभिप्रेता
ह गतिरि॰ति। विछंति लीयंते अस्मिन् विछं त्यस्माल्लोकान् इति वा वेवेष्टि व्याप्नोतीति वा विछ्यति दीप्यत इति वा अधिभूतानि सर्वाणि प्राणिजातानि द्विआदिश्चानि अंते
पुरेहावसानेषु यतः अहमिच्छन्नस्मि अभावमित्यर्थः इच्छितं वन्ति तत् इस्मि सर्वकामप्रपूरकमिति विशेषेण श्लीनि प्रस्रवति कामं क्षीरमिति वा चकरात् सिंचतीत्यर्थो वर्तते

गतिश्च सर्वभूतानां प्रजनश्चापि भारत व्याप्तो मे रोदसी पार्थ कान्तिश्चाभ्यधिका मम ४१ अधिभूतानि चान्तेषु तदिच्छंश्चा
स्मि भारत क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ४२ दमात्सिद्धिमभीप्सन्तो मां जनाः कामयन्ति हि दिवं चोर्वीं च मध्यं च
तस्माद्दामोदरो ह्यहं ४३ पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा ममैतानि सदा गर्भे पृश्निगर्भस्ततो ह्यहं ४४ ॥ ॥ ॥

प्रविशन्ति हृदयं कामान् अतिक्रामयिमिति वा विष्णुरित्यर्थः एतेन गच्छंत्यस्मिन्नागच्छंति च यस्मात् प्रजाः येनावृतं स्वं च दिवं महीं चान्तस्यमासा सर्वमिदं विभाति यदिच्छ
तो ब्रह्मचर्यं चरंति तद्धाव तो स्थाने स्यातीति श्रवणेवं वसुदान इत्यादिश्रुत्यर्थ उक्तः। ४२ दमं नं दामः तेन उन्ना उत्कर्षेण क्रमंति प्राप्नुवंति स्वर्गादिकं
यस्मादिति दामोदरं इत्यभिप्रसाहं तस्मादिति ४३ पृच्छंत्येनं जिज्ञासवो धर्मजातमिति वा पृच्छंत्येनं क्षुधिताः अत्र इति वा पृश्निर्वेदः अन्नादिवा गर्भो गर्भस्था
नित्यत्नः पृश्निगर्भोऽहमित्यर्थः ४४ ॥ ॥

ऋषयइति ॥ द्वौएतन्नामद्वयफलमाहतुः ४५ केशैरिति ॥ केशवत्सूक्ष्मैः सूर्यादिरश्मिभिस्तद्द्वारेणावाधेनगच्छतीतिकेशवइत्याहसूर्यस्येति ॥ यद्दिसर्गेतं तेजोजगद्भासय तं१

ऋषयः प्राकुर्वंस्तं मां त्रितं कूपनिपातितं पृश्निगर्भ त्रितं पाहीत्येकतद्वितपातितं ४५ ततः सब्रह्मणः पुत्र आद्यो ऋषिवरस्त्रितः उत्ततारोदपानाद्वै पृश्निगर्भानुकीर्तनात् सूर्यस्य तपतो लोकानग्नेः सोमस्य चाप्युत अंशवो यत्प्रकाशन्ते मम ते केशसंज्ञिताः ४६ सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः स्वपत्न्यामाहितो गर्भ उतथ्येन महात्मना ४७ उतथ्येन्तर्हिते चैव कदाचिद्देवमायया बृहस्पतिरथाविन्दत्तत्पत्नीं तस्य महात्मनः ४८ ततो वै तमृषिश्रेष्ठं मैथुनोपगतं तथा उवाच गर्भः कौन्तेय पञ्चभूतसमन्वितः ४९ पूर्वागतोहं वरद नार्हसे अंबां प्रबाधितुं एतद्बृहस्पतिः श्रुत्वा चुक्रोध च शशाप च ५० मैथुनायागतो यस्मात्त्वयाहं विनिवारितः तस्मादंधो यास्यसि त्वं मच्छापान्नात्र संशयः ५१ स शापादृषिमुख्यस्तु दीर्घं तम उपेयिवान् स हि दीर्घतमा नाम नाम्ना ह्यासीदृषिः पुरा ५२ वेदानवाप्य चतुरः सांगोपांगान्सनातनान् प्रयोजयामास तदा नाम गुह्यमिदं मम ५३ ॥ ॥

तेरिति ॥ पञ्चं इममित्यस्यां भोगेनात तेजो विद्रुमानामकमिति भगवद्वचनार्थः केशवमदस्सुत्यस्तुत्यामिदं ४६ केशवशब्दनयफलमंधस्य चक्षुः प्राप्तिरित्याह स्वपत्न्यामिति ॥ ४७ ५० ५३

५३ गौतमः गोशब्देन चक्षुरुच्यते चक्षुष्मत्तम इत्यर्थः ५४ तापनादाप्यायनाच्च लोकं हर्षयत इति द्वौ अग्नीषोमौ जाठराग्निरूपौ तौ केशाख्यस्य निर्दिष्टौ के
शा इत्येतमर्थं सुसाहयितुं अग्नीषोमयोर्भोक्तृभोग्ययोरेकयोनित्वमाह देवानामित्यादिना एकयोनित्वं विना भोक्तृभोग्यभावासंभवः अन्यथा वाय्वग्नियोन्योःस्य

सचक्षुष्मान्समभवद्गौतमस्त्वाप्रवसुनः सर्वंहिवरदंनामकेशवेतिममार्ज्जुन ५३ देवानामथसर्वेषामृषीणांचमहात्मनां
अग्निः सोमेनसंयुक्तएकयोनित्वमागतः ५४ अग्नीषोममयंतस्माज्जगत्कृत्स्नंचराचरं अपिहिपुराणेभवतिएकयो
न्यात्मकावग्नीषोमौदेवाश्चाग्निमुखाइति एकयोनित्वाच्चपरस्परंमहेतौलोकान्धारयतइति ५६ शंतोमोक्षधर्मे
पुनारायणीये अर्ज्जुनउवाच अग्नीषोमौकथंपूर्वमेकयोनीप्रवर्त्तितौ एषमेसंशयोजातस्तंछिंधिमधुसूदन १
श्रीभगवानुवाच हंततेवर्त्तयिष्यामिपुराणंपांडुनंदन आत्मतेजोद्भवंपार्थशृणुष्वैकमनामम २ संप्रक्षालन
कालेतिक्रांतेचतुर्युगसहस्रांतेऽव्यक्तेसर्वभूतप्रलयेसर्वभूतस्थावरजंगमे ३ ॥ ॥ ॥

शेचक्षुषोरपितेजोमयभोक्तृभावः स्यादित्याशयेनाहपरस्परंमहेतइति भोक्तृभोग्यत्वमितिशेषः ५६ अध्यायः तेजोद्भवंस्वाधिरावं संप्रक्षालनकालेप्रलयकाले
१ चतुर्युगानांसहस्रान्तेकृते जलेकार्णवेसलिलवह्निरेकसमुद्रे ३ ॥

आपइत्येवमिति सलिलस्योक्तो दृष्टांतो भवतीत्यर्थः तो ब्रह्मभूतस्य अप्ययो यः सलिलशब्देनोपादानात्‌ एकार्णववद्‌ द्वितीयेऽर्थः प्रतिष्ठिते स्वमहिम्नी
ति शेषः ४ नरा आश्रक्ष्यासी स्वकृतः नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो यदिति सि तावता ऋतिभागस्यार्थं संगच्छतीति नरा
आमिति। सति प्रधाने असति सूक्ष्मे व्यक्ते परमाणवादौ। अव्यक्ते मायाशवलपरव्योमाख्ये ५ एवं निर्विशेषसन्मात्रे ब्रह्मणि अवस्थिते सति अनिर्व

ज्योतिर्द्दुगिणा वायुरहितेऽन्धे तमसि जलौकार्णवे लोके ३ आपइत्येवं ब्रह्मभूतसंज्ञके द्वितीये प्रतिष्ठिते नैव रात्र्या
न दिवसेन न सत्ति नासत्ति न व्यक्तेन चाप्यव्यक्ते व्यवस्थिते ५ एवमस्यामवस्थायां नारायणगुणाश्रयादजरामरादनिंद्रि
याद्‌ग्राह्यादसंभवात्‌ सत्यादहिंस्रात्‌ ललामाद्‌ विविधप्रवृत्तिविशेषाद्‌ वैरादक्षयादमरादजरादमूर्तितः सर्वव्यापिनः
सर्वकर्तुः शाश्वतस्तमसः पुरुषः प्रादुर्भूतो हरिरव्ययः ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चनीयात्तमसः सृष्टिमाह। एवमस्यामित्यादिना। नारायणगुणानामैश्वर्यादीनामाश्रयात्‌। अजरामरत्वं प्रसूताकाशेऽस्ति ननु तत्संस्त्रोतेंद्रियात्मनो नि
रिंद्रियत्वमस्तीत्यस स्मृत उक्तं अनिंद्रियादिति। तद्‌ अपि कालेऽस्तीत्यत आह अग्राह्यादिति कालस्यापि षड्‌इंद्रियवेद्यत्वमस्ति इदानीं घटं पश्यामीत्याद्यनुभ
वात्‌ विशिष्टप्रत्यक्षस्य च विशेषणप्रत्यक्षं विनाऽसंभवादित्यर्थः अथवा तार्किकाभिमतमनः प्रत्यक्षात्म आत्मा सर्थमिदं। तदस्येश्वरे वारणार्थमाह।
असंभवादिति। तस्यापि हिंस्यत्वादिकं सकर्तृकं कार्यत्वात्‌ संमतवदित्यनुमा ॥ ॥ ॥ ॥

ततः संभवेद्विहिता नचैतत्तथा । समजुत्वाभ्युपगमात् । स्वमात्मव्यवहारतइतिशेषः ननुपरीक्षातः समस्तमस्यापिहितत्रहेतुः अहिंसादितिलक्षणव्याप्तोहिनिद्रा
द्वेषरोगापस्तुतभीजयसेवनतुहिनस्तित्तदेहेतनसमलेआरिसत्त्वेनोपपद्यतेत्यर्थः नन्वेवंनामान्तरेणाप्यसद्देवोक्तेनेसोहलत्वामादितिचेत्तामैवा
रत्नवड्डावरूपादित्यर्थः अतएवविविधाः प्रवृत्तिविशेषाः यस्मात् । भावरूपत्वेपिजडत्वात्तुच्छत्वाच्चैवरक्षपजणमस्तुमत्त्वेयोस्यसंभवं तिईद
शमपिसर्वव्यापकंसर्वकर्तृत्वेचेतिशाम्यन्तर्वंमनादित्यंचम्यर्थेप्रथमा । तमसः सकाशात्विराट्त्मा प्रादुर्भूतोव्यक्ततागतः अहंमसयविषयत्वे

निदर्शनमपिसूत्रभवति ७ नासीद्रहोनरात्रिरासीन्नसदासीन्नासदासीत्तमए
वपुरस्ताद्भवद्विश्वरूपं साविश्वरूपस्यरजनीहिएवमस्यार्थोनुभाव्यः ८ ॥ ॥

ततः हिरण्मयः इ निदर्शनस्फूर्तिरूपंप्रमाणं ७ नेदंवपठितेनासीदितितानमएवपुरस्ताद्भवद्विश्वरूपमितिअस्मिन्नर्थेस्फुसंततरमप्यस्ति । तम
आ[illegible]सीत्तमसागूढमग्रेऽप्रकेतंसलिलंसर्वमाइदंतुच्छ्येनाभ्वपिहितंयदासीत्तमसस्तन्महिनाजायतैकमितितस्यांश्रुतिः प्राग्यौनास
वमस्यार्थोनुभाव्यः । अग्नीषोमयोरेकयोनित्वंभाषितमेवमुद्राममावशेषोक्त्यापुनरप्यनुभाव्यः हरिप्रभवत्वेनेत्यर्थः ८ ॥ ॥ ॥ ॥

तेदेवा हृतं स्पर्द्धानी मित्यादिना स पुरुषः हरिः ब्रह्मणा ब्राह्मणेन मंत्रवादेपि ब्राह्मणमाहात्म्यप्रख्यापकः ९ हे अग्ने त्वं देवानां हितोसि यतः त्वं यज्ञानां होता हो

तस्य देवानीतमसः संभवस्य पुरुषस्य ब्रह्मयोनेर्ब्रह्मणः प्रादुर्भावे स पुरुषः प्रजाः सिसृक्षमाणो नेत्राभ्यामग्नीषोमौ ससृजे
ततो भूतसर्गेषु प्रजाक्रमवशाद् ब्रह्म क्षत्रमुपातिष्ठत् यः सोमस्तद् ब्रह्म यद् ब्रह्म ते ब्राह्मणाः योग्निस्तत् क्षत्रं क्षत्राद् ब्रह्म बलवत्त
रं कस्मादिति लोकप्रत्यक्षगुणमेतत्तद्यथा ब्राह्मणेभ्यः पूर्वं भूतेभ्यो सन्नपूर्वं दीप्यमाने ग्नौ जुहोतीति यो ब्राह्मणमुखे जु
होतीति कृत्वा ब्रवीमि भूतसर्गः कृतो ब्रह्मणा भूतानि च प्रतिष्ठाप्य त्रैलोक्यं धारयत इति मंत्रवादोपि हि भवति ९ त्वमग्ने यज्ञा
नां होता विश्वेषां हितो देवानां मानुषाणां च जगत इति १० निदर्शनं चात्र भवति विश्वेषामग्ने यज्ञानां त्वं होतेति त्वं हितो देवैर्मा
नुष्ये जगत इति अग्निर्हि यज्ञानां होता कर्त्ता स चाग्निर्ब्रह्म १२ ॥ ॥ ॥ ॥ ॥ ॥

तत्स्वरूपो ऋत्विगसि होता त्वेनाग्निं स्तुवन् अग्निनापि होता ब्राह्मणोधिकरति दर्शितं १० संक्षिप्य मंत्रमाचष्टे निदर्शनमिति ११ विस्तरेण आचष्टे। अग्निर्ही
ति होता ऋत्विक् न यजमानः उभौ होतृशब्दार्थौ उभयरूपो अग्निर्ब्रह्म ब्राह्मणः १२

मो०
५३४

534

ब्राह्मणस्यैवदक्षारिष्विनब्रह्मभावंउपपादयतिनहीत्साहिना १३ अग्नाविति अग्नौहुतेसतिब्राह्मणेन तप्यतिब्राह्मणमुखेहुतेचेद अग्न्यादयोदेवताः ब्राह्मणशरीरंप्रविश्यधारयंत्यस्तस्मात्प्रसंतीतिशतपथवाक्यार्थः १५ शेकाइवशेकाः शिकसमुदायः यथाशिक्यंगव्यादीन्धारयतिएवंब्राह्मणोमत्यादी

नह्येतेमंत्राणांहवनमस्तिनविनापुरुषंतपः संभवति हविर्मंत्राणांसंपूजाविद्यतेदेवमानुषऋषीणामनेनत्वंहोतेतिनि
युक्तः येचमानुषहोत्राधिकारास्तेचब्राह्मणस्यहियाजनंविधीयतेनक्षत्रवैश्ययोर्द्विजास्तेऽस्तस्माद्ब्राह्मणास्त्वग्निमु
तायज्ञानुद्वहंति यज्ञास्तेदेवांस्तर्पयंतिदेवाः पृथिवींभावयंतिशतपथेऽपिहिब्राह्मणमुखेभवति १३ अग्नौसमि[illegible]धे
सजुहोतियोविद्वान्ब्राह्मणमुखेनाहुतिंजुहोति १४ एवमप्यग्निभूताब्राह्मणाविद्वांसोऽग्निंभावयंति अग्निर्विष्णुः
सर्वभूतान्यनुप्रविश्यप्राणान्धारयति १५ अपिचात्रसनत्कुमारगीताः श्लोकाभवंति ब्रह्माविश्वंसृजत्सर्वंसर्वादिर्नि
रवस्कृते ब्रह्मवेद्यौदेवंगर्छेभजराब्रह्मयोनयः ब्राह्मणानांमतिर्वाक्यंकर्मश्रद्धातपांसिच धारयंतिमहींद्यांचैशेको
वागमृतंतथा १६ नास्तिसत्यात्परोधर्मोनास्तिमातृसमोगुरुः ब्राह्मणेभ्यः परंनास्तिप्रेत्यचेहचभूतये १७ नैषा
मुक्षावहतिनोतवाहानगर्गरोमथ्यतिसंप्रदाने अपध्वस्तादस्युभूताभवंतियेषांराष्ट्रेब्राह्मणावृत्तिहीनाः १८ ॥।

६

राम०
५३४

न्इत्यर्थः १७ गर्गरः दधीसुतैलादिनिपीडनयंत्रंयेषांराष्ट्रेकृष्यादिहीनत्वान्नाद्यराजानोदस्यवोराष्ट्रंभवंतीत्यर्थः १८

न१

वेदपुराणेतिहासप्रामाण्यान्नारायणप्रमुखेवाङ्कृताः सर्वात्मानः सर्वकर्त्तारः सर्वभावनाः स्वब्राह्मणाख्या वाक्संयमकाले हितस्य वरप्रदस्य
देवदेवस्य ब्राह्मणाः प्रथमं प्रादुर्भूता ब्राह्मणेभ्यश्च शेषा वर्णाः प्रादुर्भूताः इत्थं च सुरासुरविशिष्टा ब्राह्मणा यत्र मया ब्रह्मभूतेन पुरा स्वयमेवो
त्पादिताः सुरासुरमहर्षयः भूतविशेषाः स्थापिता निगृहीताश्च तस्माद्धर्मेणानिमित्तं हि गौतमाद्धरिश्मश्रुतामिंद्रः प्राप्तः कौशिकनिमि
त्तं चेंद्रो मुष्कवियोगं मेषवृषणत्वं चावाप अश्विनोर्ग्रहप्रतिषेधोद्यतवज्रस्य पुरंदरस्य च्यवनेन स्तंभितो बाहुः क्रतुवधप्राप्तमन्युना च दक्षेण भूय
स्तपसा चात्मानं संयोज्य नेत्राकृतिरन्या ललाटे रुद्रस्योत्पादिता त्रिपुरवधार्थं दीक्षामुपगतस्य रुद्रस्य उशनसा जटाः शिरस उत्कृत्य प्रयुक्ताः ततः प्रा
दुर्भूता भुजगास्तैरस्य भुजगैः पीड्यमानः कंठो नीलतामुपगतः पूर्वे च मन्वंतरे स्वायंभुवे नारायणहस्तग्रहणान्नीलकंठत्वमेव च। अमृतोत्पा
दने पुरश्चरणतामुपगतस्यांगिरसो बृहस्पतेरुपस्पृशतो न प्रसादं गतवत्यः किलापः अथ बृहस्पतिरपो चुक्रोध यस्मान्ममोपस्पृशतः कलु
षीभूता न च प्रसादमुपगतास्तस्मादद्यप्रभृति झषमकरकच्छपजंतुभिः कलुषीभवतेति तदाप्रभृत्यापो यादोभिः संकीर्णाः संप्रवृत्ताः विश्व
रूपो हि वै त्वाष्ट्रः पुरोहितो देवानामासीत् स्वस्रीयोऽसुराणां स प्रत्यक्षं देवेभ्यो भागमदात् परोक्षमसुरेभ्यः अथ हिरण्यकशिपुं पुरस्कृत्य वि
श्वरूपमातरं स्वसारमसुरा वरमयाचंत हे स्वसः अयं ते पुत्रस्त्वाष्ट्रो विश्वरूपस्त्रिशिरा देवानां पुरोहितः प्रत्यक्षं देवेभ्यो भागमदात् परोक्षमस्मा
कं ततो देवा वर्द्धंते वयं क्षीयामस्तदेनं त्वं वारयितुमर्हसि तथा यथास्मान्भजेदिति अथ विश्वरूपं नंदनवनमुपगतं माता उवाच पुत्र किं प
रपक्षवर्द्धनस्त्वं मातुलपक्षं नाशयसि नार्हस्येवं कर्त्तुमिति स विश्वरूपो मातुर्वाक्यमनतिक्रमणीयमिति मत्वा संपूज्य हिरण्यकशिपुमगा
त् हैरण्यगर्भाच्च वसिष्ठाद्धिरण्यकशिपुः शापं प्राप्तवान् यस्मात्त्वयान्यो वृतो होता तस्मादसमाप्तयज्ञस्त्वमपूर्वात्सत्वजाताद्वधं प्राप्स्य
सीति तच्छापदानाद्धिरण्यकशिपुः प्राप्तवान्वधं। अथ विश्वरूपो मातृपक्षवर्द्धनोऽत्यर्थं तपस्यभवत् तस्य व्रतभंगार्थमिंद्रो बह्वीः श्रीमत्यो
प्सरसो नियुयोज ताश्च दृष्ट्वा मनः क्षुभितं तस्याभवत् तासु चाप्सरःसु नचिरादेव सक्तोऽभवत् सक्तं चैनं ज्ञात्वाप्सरस ऊचुः गच्छामहे वयं यथा
गतमिति। तास्त्वाष्ट्र उवाच क्व गमिष्यथ आस्यतां तावन्मया सह श्रेयो भविष्यतीति। तास्तमब्रुवन्वयं देवस्त्रियोऽप्सरसः इंद्रं देवं वरदं पुरा प्रभ

३३ विमुंचणीमहरति। अथ तविश्वरूपोऽब्रवीद्दधीचं स इंद्रो देवानामविष्यतीति। ततो मंत्रान् जजापैतैर्मंत्रैरवर्द्धत त्रिशिराः एकेनास्येन सर्वलोकेषु यथावद्द्वि
जैः क्रियावद्भिर्यज्ञेषु सुहुतं सोमं पपौ एकेनान्नं एकेनेंद्रादीन्देवानथेंद्रस्तं विवर्द्धमानं सोमपानाप्यायितसर्वगात्रं दृष्ट्वा चिंतामापेदे स हि देवै
ः तैर्देवैः सहेंद्रो ब्रह्माणमभिजग्मुः विश्वरूपेणास्मदर्पितेषु यज्ञेषु सुहुतः सोमः पीयते वयमभागाः संवृत्ताः असुरपक्षो वर्द्धते वयं क्षीयामः तदर्हसि
३४ नो विधातुं श्रेयोनंतरमिति। तान्ब्रह्मोवाच ऋषिर्भार्गवस्तपस्तप्यते दधीचः स याच्यतां वरं स यथा कलेवरं जह्यात्तथा विधीयतां तस्यास्थि
३५ भिर्वज्रं क्रियतामिति। ततो देवास्तत्रागच्छन्यत्र दधीचो भगवान्ऋषिस्तपस्तेपे। सेंद्रा देवास्तं तथाभिगम्योचुर्भगवंस्तपः सुकुशलमविघ्नं चेति
तान्दधीच उवाच स्वागतं भवद्भ्यः उच्यतां किं क्रियतामिति। यद्वक्ष्यथ तत्करिष्यामीति तं ते अब्रुवन् शरीरपरित्यागं लोकहितार्थं भगवान्कर्तुमर्हतीति
३६ ति अथ दधीचस्तथैवाविमनाः सुखदुःखसमो महायोगी आत्मानं समाधाय शरीरपरित्यागं चकार तस्य परमात्मन्यवसृते तेतान्यस्थीनि धाता संगृ
३७ ह्य वज्रमकरोत्। तेन वज्रेणाभेद्येनाप्रधृष्येण ब्रह्मास्थिसंभूतेन विष्णुप्रविष्टेन इंद्रो विश्वरूपं जघान शिरसां चास्य छेदनमकरोत्। तस्मादनंतरं वि
श्वरूपगात्रमथनसंभवं त्वाष्ट्रोत्पादितमेवारिं वृत्रमिंद्रो जघान। तस्यां द्वैधीभूतायां ब्रह्मवध्यायां भयादिंद्रो देवराज्यं परित्यज्य अप्सु संभवां च
३८ शीतलां मानससरोगतां नलिनीं प्रतिपेदे तत्र चैश्वर्ययोगादणुमात्रो भूत्वा बिसग्रंथिं प्रविवेश। अथ ब्रह्मवध्याभयप्रनष्टे त्रैलोक्यनाथे शचीपतौ
जगदनीश्वरं बभूव देवान्रजस्तमश्चाविवेश। मंत्रा न प्रावर्तंत महर्षीणां रक्षांसि प्रादुरभवन् ब्रह्म चोत्सादनं जगाम। अनिंद्राश्चाबला लोकाः सु
३९ प्रधृष्या बभूवुः अथ देवा ऋषयश्चायुषः पुत्रं नहुषं नाम देवराज्येऽभिषिषिचुः नहुषः पंचभिः शतैर्ज्योतिषां ललाटे ज्वलद्भिः सर्वभूततेजोहरैस्त्रि
४० विष्टपं पालयां बभूव। अथ लोकाः प्रकृतिमापेदिरे। स्वस्थाश्च हृष्टाश्च बभूवुः अथोवाच नहुषः सर्वं मां शक्रोपभुक्तमुपस्थितं मन्ते शचीमिति स
४१ एवमुक्त्वा शचीसमीपमगमत् उवाच चैनां सुभगे हमिंद्रो देवानां भज त्वं मामिति। तं शची प्रत्युवाच प्रकृत्या त्वं धर्मवत्सलः सोमवंशोद्भवश्च नार्हसि
परपत्नीधर्षणं कर्तुमिति। तामथोवाच नहुषः ऐंद्रं पदमध्यास्यते मया अहमिंद्रस्य राज्यरत्नहरो नात्राधर्मः कश्चित् त्वमिंद्रोपभुक्तेति सा तं
४२ मुवाचास्ति मम किंचिद्व्रतमपर्यवसितं तस्यावभृथे त्वामुपगमिष्यामि कैश्चिदेवाहोभिरिति। स शच्यैवमभिहितो जगाम। अथ शची दुःखशोकार्ता भ
४३

येनमां त्रातुं बृहस्पतिरुवाच अनेनैव व्रतेन तपसा चान्विता देवीं वरदामुपश्रुतिमाह्वय तदा सा ते इंद्रं दर्शयिष्यतीति। सा यमहानियमस्थिता देवीं वरदामुपश्रु ४४
तिं मंत्रैराह्वयति। सोपश्रुतिः शचीसमीपमगात् उवाच चैनामियमस्मीति तया हूतोपस्थिता किं ते प्रियं करवाणीति। तां मूर्ध्ना प्रणम्योवाच शची भगवत्यर्हसि मे भर्तारं ४५
दर्शयितुं त्वं सत्या ऋता चेति सैनां मानसं सरो नयत्। तत्रेंद्रं बिसग्रंथिगतमदर्शयत्। तामथ पत्नीं कृशां ग्लानां चेंद्रो दृष्ट्वा चिंतयांबभूव। अहो मम दुःखमिदमुप
गतं तन्नष्टं हि मामियमन्विष्यत्यभ्यगमद् दुःखार्तेति। तामिंद्र उवाच कथं वर्तयसीति सा तमुवाच नहुषो मामाह्वयति। पत्नीं कर्तुं कालश्चास्य मया कृत इति। ता
मिंद्र उवाच। गच्छ नहुषस्त्वया वाच्यः। अपूर्वेण मामृषियुक्तेन त्वयानेन तल्पमधिरूढ उद्वहस्वेति। इंद्रस्य महांति वाहनानि संति मनःप्रियाण्यधिरूढानि मया त्वमने ४६
नोपयातुमर्हसीति। सैवमुक्ता हृष्टा जगाम। इंद्रो बिसग्रंथिमेवाविवेश भूयः। अथेंद्राणीमभ्यागतां दृष्ट्वा तामुवाच नहुषः सकाल इति। तं शच्यब्रवीच्छक्रेणाप ४७
योक्तं। स महर्षियुक्तं वाहनमधिरूढः शचीसमीपमुपागच्छत्। अथ मैत्रावरुणिः कुंभयोनिरगस्त्यऋषिवरो महर्षीन्विकृक्रियमाणांस्तान्नहुषेणापश्यत् ४८
पद्भ्यां च तमस्पृशत्। ततः स नहुषमब्रवीत्। अकार्यप्रवृत्त पापपतस्व महीं सर्पो भव यावद्भूमिर्गिरयश्च तिष्ठेयुस्तावदिति। स महर्षिवाक्यसमकालमेव ४९
तस्माद्यानादवापतत्। अथानिंद्रं पुनस्त्रैलोक्यमभवत्। ततो देवा ऋषयश्च भगवंतं विष्णुं शरणमिंद्रार्थेऽभिजग्मुः। ऊचुश्चैवं भगवन्निंद्रं ब्रह्महत्याभिभूतं त्रा
तुमर्हसीति। ततः स वरदस्तानब्रवीत्। अश्वमेधं यजंतु वैष्णवं शक्रोऽभियजतां ततः स्वस्थानं प्राप्स्यतीति। ततो देवा ऋषयश्चेंद्रं नापश्यन्यदा तदा शचीमूचुः। ५०
गच्छ सुभगे इंद्रमानयस्वेति। सा पुनस्तत्सरः समभ्यगच्छदिंद्रश्च तस्मात्सरसः समुत्थाय बृहस्पतिमभिजगाम। बृहस्पतिश्चाश्वमेधं महाक्रतुं शक्रायाह ५१
रत्। तत्र कृष्णसारंगं मेध्यमश्वमुत्सृज्य वाहनं तमेव कृत्वा इंद्रं मरुत्पतिं बृहस्पतिः स्वस्थानं प्रापयामास। ततः स देवगणैर्देवैर्ऋषिभिः स्तूयमानस्त्रिवि ५२
ष्टपस्थो निःकल्मषो बभूव ब्रह्महत्यां चतुर्षु स्थानेषु वनितास्वग्निवनस्पतिगोषु व्यभजत्। एवमिंद्रो ब्रह्मतेजःप्रभावोपबृंहितः शत्रुवधं कृत्वा स्वस्थानं प्रा ५३

मो०
५३६

५४ ५५ ५६ ५७ ५८

536

पितः आकाशगंगागतश्चपुरा भरद्वाजो महर्षिरुपास्पृशत्। त्रीन्क्रमान्क्रमता विष्णुनाभ्यासादितः स भरद्वाजेन सलिलमतलेन पाणिना रसितादि
तः स लक्ष्मणो रक्षः संवृत्तः भृगुणा महर्षिणा शप्तो ऽग्निः सर्वभक्षत्वमुपानीतः अदितिर्वै देवानामन्नमपचत्। एतद्भुक्त्वासुरान्हनिष्यंतीति। तत्र
बुधो व्रतचर्यासमाप्तावागच्छद् अदितिं चाब्रवीत् भिक्षां देहीति तत्र देवैः पूर्वमेतत्प्राश्यं नान्येनेत्यदितिर्भिक्षां नादात् अथ भिक्षाप्रत्याख्यानरुषि
तेन बुधेन ब्रह्मभूतेन अदितिः शप्ता अदितेरुदरे भविष्यति व्यथा विवस्वतो द्वितीयजन्मनि अंडसंज्ञितस्य चांडमातुरदित्याः स्मारितः समाप्तेंडो विव
स्वान भवद् ब्रह्मदेवः दक्षस्य यौ वै दुहितरः षष्टिरासन् तासां कस्यपाय त्रयोदश प्रादात् दश धर्माय दश मनवे सप्तविंशतिमिंदवे। तासु तुल्या
सु नक्षत्राख्यां गतासु सोमो रोहिण्यामभ्यधिकं प्रीतिमानभूत् ततस्ताः शिष्टाः पत्न्य ईर्ष्यावत्यः पितुः समीपं गत्वा इममर्थं शशंसुः भगवन्नस्मा
सु तुल्यप्रभावासु सोमो रोहिणीं प्रत्यधिकं भजतीति। सो ऽब्रवीद् यक्ष्मैनमाविशत्विति। दक्षशापात्सोमं राजानं यक्ष्माविवेश स यक्ष्मणाविष्टो दक्षम
गमद् दक्षश्चैनमब्रवीत् न समं वर्त्तयसीति तत्र ऋषयः सोममब्रुवन् क्षीयसे यक्ष्मणा पश्चिमस्यां दिशि समुद्रे हिरण्यसरस्तीर्थं गत्वा आत्मानमभि
षेचयस्वेति। अथागच्छत्सोमस्तत्र हिरण्यसरस्तीर्थं गत्वा चात्मनः सेचनमकरोत्। स्नात्वा चात्मानं पाप्मनो मोक्षयामास॥ ॥ ॥ ॥ ॥

५९ ६० ६१

राम०
५३६

तत्र चावभासितस्तीर्थे यत्र सोमस्तत्र प्रभृति च तीर्थं तत्प्रभासमिति नाम्ना ख्यातं बभूव। तच्छापादद्यापि सोमः अमावास्यांतरास्थः पौर्णमासीमात्रेऽधिष्ठितः मेघलेखाप्रतिच्छन्नं वपुर्दर्शयति मेघसदृशं वर्णमगमत्तदस्य शशलक्ष्म विमलमभवत्। स्थूलशिरा महर्षिर्मेरोः प्रागुत्तरे दिग्विभागे तपस्तेपे तस्य तप्यत

प्रवहः शुचिर्वायुर्विवायमानः शरीरमस्पृशत्। स तपसा तापितशरीरः कृशो वायुनोपवीज्यमानो हृदये परितोषमगमत्। तत्र किल तस्य अनिलव्यजनकृतपरितोषस्य सद्यो वनस्पतयः पुष्पशोभां न दर्शितवन्त इति स एतानशपत् न सर्वकालं पुष्पवन्तो भविष्यथेति नारायणो लोकहितार्थं वडवामुखो नाम पुरा महर्षिर्बभूव तस्य मेरौ तपस्तप्यतः समुद्र आहूतो नागतस्तेनामर्षितेनात्मगात्रोष्मणा समुद्रः स्तिमितजलः कृतः स्वेदप्रस्यन्दनसदृशश्चास्य लवणभावो जनितः उक्तश्चाप्यपेयो भविष्यसि एतच्च ते तोयं वडवामुखसंज्ञितेन पीयमानं मधुरं भविष्यति तदेतदद्यापि वडवामुखसंज्ञितेनानुवर्तिना तोयं समुद्रात्पीयते हिमवतो गिरेर्दुहितरमुमां कन्यां रुद्रश्चकमे भृगुरपि च महर्षिर्हिमवन्तमागम्याब्रवीत् कन्यामिमां मे देहीति तमब्रवीद्धिमवानभिलक्षितो वरो रुद्र इति। तमब्रवीद्भृगुर्यस्मात्त्वयाहं कन्यावरणकृतभावः प्रत्याख्यातस्तस्मान्न रत्नानां भवान्भाजनं भविष्यतीति अद्य प्रभृत्येतदवस्थितमृषिवचनं तदेवंविधं माहात्म्यं ब्राह्मणानां ६२ क्षत्रमपि च ब्राह्मणप्रसादादेव शाश्वतीमव्ययां च पृथिवीं पत्नीमभिगम्य बुभुजे तदेतद्ब्रह्माग्नीषोमीयं तेन जगद्धार्यते ६४ ॥ ॥

पल्लव्यमानस्य सर्वेषां मूलं ब्राह्मणमाहात्म्यकथनपरो ग्रन्थः सहार्थः ६१ क्षत्रियमाहात्म्यमप्याह क्षत्रमपि चेति ६३ उपसंहरति तदेतदिति यदेतद्ब्रह्म क्षत्रं ततो जातौ अग्नीषोमीयं ब्रह्म तत्ते नैव तेजसा जगद्धार्यते। तौ जगद्धार्यौ अग्नीषोमीयमित्यर्थः ६४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सूर्याचंद्रमसोअग्नीषोमौचक्षुः परमात्मनेत्राभ्यामुन्मीलनात् केशाः अंशवः किरणाः बोधयन्चंद्रः तापयन्सूर्यः तौजगत्हर्षयतः यस्मात्तस्मा
त्तौहृषी उच्येते इत्यत्रस्वरूपधान्यकिरीटिनिकिल्वंअल्लुकसमासः हृषीअग्नीषोमौकेशौअंशुरूपौयस्यसः हृषीकेशइत्यर्थः ६५ हीनामनिवैक्ति।
इलेतिइलोपहूतासहदिवेसारिमंत्रेणाहूतोहं योगात्तत्पत्रभागंहरेहरणंकुर्वे ततोहंहरिरित्यर्थः वर्णश्चहरिः हरिन्माणिक्यतुल्यः तस्माद्धरिरिति ६६

उच्यतेसूर्याचंद्रमसोचक्षुः केशाश्चैवांशवः स्मृताः बोधयंस्तापयंश्चैवजगदुत्तिष्ठतेपृथक् बोधनात्तापनाच्चैवजगतोह
र्षणंभवेत्अग्नीषोमकृतैरेभिः कर्मभिः पांडुनंदन हृषीकेशोहमीशानोवरदोलोकभावनः ६५ इलोपहूतयोगेन।
हरेभागंक्रतुष्वहं वर्णश्चमेहरिः श्रेष्ठस्तस्माद्धरिरहंस्मृतः ६६ धामसारोहिभूतानामृतंचैवविचारितं ऋतधामात
तोविप्रैः सद्यश्चाहंप्रकीर्तितः ६७ नष्टांचधरणींपूर्वमविंदंवैगुहागतां गोविंदइतितेनाहंदेवैर्वाग्भिरभिष्टुतः ६८
शिपिविष्टेतिचाख्यायांहीनरोमाचयोभवेत् तेनाविष्टंतुयत्किंचिच्छिपिविष्टेतिचस्मृतः ६९ यास्कोमामृषिरव्यग्रो
नैकयज्ञेषुगीतवान् शिपिविष्टइतिह्यस्माद्गुह्यनामधरोह्यहं ७० ॥ ॥ ॥ ॥ ॥ ॥

ऋतधामशब्दंनिर्वक्ति धामशब्दोलोकसारवाची ऋतमबाधितंधामसत्तास्फूर्तिरूपंयस्यसऋतधामेत्यर्थः ६७ नष्टांजलेमग्नांगांधरणींवि
ददितिलभतइतिगोविंदइत्यर्थः ६८ हीनानिसक्तानिरोमाणिवेरोमाणिअंशवः अवयवाः येनसशिपिर्निष्फलइत्यर्थः तेनशिपिनारूपेण
यत्किंचितआविष्टंयेनअंतोयःशिपिविष्टइत्यर्थः ६९ ७० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्प३

अधीनस्त्वं वेदहरणे वलायां पातालेः नहितं ७१ अनशक्तं निवृत्तिनहीति ७२ नोक्तेति सत्यभाषित्वात् ७३ पृथिव्यप्तेजोसि सत्तवाय्वाकाशोसत तदुभयात्मत्वाद्दोसत्यनामाहमित्यर्थः पौष्करेमन्त्राभिकमलो ७४ सत्तेन ताय मा पालयते वासत्वा तनोतिविस्तारयति । सत्वमस्यास्मिन्निति सत्वतः सत्वपूर्वकर्मैव सर्वं कर्माचरतीति सत्वतः ताः सेतान पालनयो तानुविस्तारेश्च यांसत्वशाह पूर्वोभ्यां ऽग तः पर्वमह न्धामिसपत्र ऽक्तो मत्व

स्तत्वां मां शिपिविष्टेति यास्कऋषिरुदारधीः मत्प्रसादादधो नष्टं निरुक्तमभिजग्मिवान् ७१ नहि जातो न जायेयं न जनिष्ये क दाचन क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः ७२ नोक्तपूर्वं मया क्षुद्रमश्लीलं वा कदाचन ऋता ब्रह्मसुता सा मे सत्या दे वी सरस्वती ७३ सच्चासच्चैव कौन्तेय मयावेशितमात्मनि पौष्करे ब्रह्मसदने सत्यं मामृषयो विदुः ७४ सत्वान्न च्युतपूर्वोहं स त्वं वै विद्धि मत्कृतं जन्मनीहाभवत्तत्पौर्विकं मे धनंजय ७५ निराशीः कर्मसंयुक्तः सत्वतश्चाप्यकल्मषः सात्वतज्ञानदृ ष्टोहं सत्वतामिति सात्वतः ७६ कृषामि मेदिनीं पार्थ भूत्वा कार्ष्णायसो महान् कृष्णो वर्णश्च मे यस्मात्तस्मात्कृष्णोहमर्जुन ७७ ॥ ॥ ॥ ॥ ॥

स्प१

थीयः न प्रयोगाकुलकान्मस्त शाह्याद्दीपा अनेन नद्भिन्नाताता नुकरणेमेव प्राप्तिपरिकां सत्ब्रह्मनदं स्तः सत्वतः । आर्षमत्वातेषामिदं नत्वं सात्वतं । पांचरात्रा दितज्ज्ञानह्यानेन दृष्टोहं सात्वतः सत्वत एव सात्वतो वा स्वभिप्रेता हसत्वादिति १७५ निराशीः कर्मनिष्कामकर्म ७६ कृषामीति । कृष्णायसो लांगल कालरूपी ७७ ॥ ॥ ॥ ॥ ॥ ॥

विहगः पक्षिवाची ओमम्बरिक्षमामानात् वायुस्तेजसोः मेघरूपाम्बुचवर्तनैकुः पृथ्वी इशब्द आकाशवचनः एतेषां समाहारो विकुंठवर्णागमेन विकुंठशब्द
सन्नः विकुंठनाम यं श्लेषणात्कर्ता वैकुंठः इत्यभिसंधायाहमेयेति। विगताकुंठा यं वानां भूतानां मेलने असामर्थ्यं यस्य सः विकुंठः स्वार्थेन द्धितः इति सङ्घे
र्थः ७९ अधरइति पृथिवी अस्याधो रम्यतो क्षः आकाशः तेउभे संजपतिसंगेन धारयती ति अधोक्षजः तस्मात् पृथिवीति। अधोक्षजः … इत्यर्थः

अनिर्दिताम्मितिन
कारलोपः ५

मयासंश्लेषिता भूमिरद्भिर्व्योम च वायुना वायुश्च तेजसा सार्धं वैकुंठत्वं ततो मम ७८ निर्वाणं परमं ब्रह्म धर्मोऽसौ पर उच्यते त
स्मान्न च्युतपूर्वोऽहमच्युतस्तेन कर्मणा ७९ पृथिवीनभसी चोभे विश्रुते विश्वतोमुखे तयोः संधारणार्थं हि मामधोक्षजमंजसा
८० निरुक्तं वेदविदुषो ये च शब्दार्थचिंतकाः ते मां गायंति प्राग्वंशे अधोक्षज इति स्थितिः ८१ शब्द एकपदैरेष व्याहृतः परम
र्षिभिः नान्यो ह्यधोक्षजो लोके ऋते नारायणं प्रभुं ८२ घृतं ममार्चिषो लोके जंतूनां प्राणधारणं घृतार्चिरहमव्यग्रैर्वेद
ज्ञैः परिकीर्तितः ८३ ॥ ॥ ॥ ॥

८० निर्वचनांतरमाह निरुक्तमिति एकपदैः पृथक्पदैः प्राग्वंशे यज्ञशालैकदेशे आनीसमंतं गच्छत्यस्मिन्निति अः आनतान्यगमने ८१ अधोक्षः
उत्सप्रहरेणः स्मात् आराहिकः सगुणाभप्रभावो जायते स्मात्सर्वमिति जः जगत्त्रयस्थितिजन्मस्थानमित्यर्थः ८२ ममवह्निस्वरूपस्यार्चिषो वर्द्ध
कमिति शेषः ८३ ॥ ॥ ॥ ॥ ॥

त्रयोधातवउणधिमृताः संत्यस्मस्त्रिधातुः ८७ विभुपदंख्याचेष्टः नचादिंनिति ९० त्रीणि ककुदानिउच्चशरेशास्कंधयोत्र्यदंष्ट्रायस्मत्रिककुदः शरीरस्येति
सामानाधिकरण्य ९१ विरिंचेणारिता क्षितस्तानापोरेसंख्यानाख्यप्रथितयंकरोनीति विरिंचरस्यार्थः रेचनादिति पारेरेचनद्वारतत्मा ध्यंचेतनमेवतस्य

त्रयोहिधातवः ख्याताः कर्मजाइतियेस्मृताः पित्तंश्लेष्माचवायुश्चएषसंघातउच्यते ८४ एतैश्चधार्यतेजंतुरेतैःक्षीणैश्चक्षी
यतेआयुर्वेदविदस्तस्मात्त्रिधातुंमांप्रचक्षते ८५ वृषोहिभगवान्धर्मः ख्यातोलोकेषुभारत नैघंटुकपदाख्यानेविद्धिमांवृ
षमुत्तमं ८६ कपिर्वराहः श्रेष्ठश्चधर्मश्चवृषउच्यते तस्माद्वृषाकपिंप्राहकश्यपोमांप्रजापतिः ८७ नचादिंनमध्यंतथा
चैवनांतंकदाचिद्विदंतेसुराश्चासुराश्च अनाद्योह्यमध्यस्तथाचाप्यनंतः प्रगीतोहमीशोविभुर्लोकसाक्षी ८८ शुचीनिश्र
वणीयानिशृणोमीहधनंजय नचपापानिगृह्णामिततोहंवैशुचिश्रवाः ८९ एकशृंगः पुराभूत्वावराहोनंदिवर्द्धनः इ
मांचोद्धृतवान्भूमिमेकशृंगस्ततोह्यहं ९० तथैवासंत्रिककुदोवाराहंरूपमास्थितः त्रिककुत्तेनविख्यातः शरीरस्यप्र
मापनात् ९१ विरिंचइतियःप्रोक्तःकापिलज्ञानचिंतकैः सप्रजापतिरेवाहंचेतनात्सर्वलोककृत् ९२ विद्यासहायवं
तंमामादित्यस्थंसनातनं कपिलंप्राहुराचार्याः सांख्यानिश्चितनिश्चयाः ९३ ॥ ॥ ॥ ॥ ॥ ॥

णीयं ९२ कपिलंपीतंआदित्यपुरुषंप्रकृत्यहंरोगेपआप्रणावान्सर्वरसवसुवर्णइतिस्कौतेः ९३ ॥ ॥ ॥ ॥ ॥ ॥

छंदांसि समष्टिरूपाणि मानीत्यात्मा भुवि चतुर्मुखः ९९ क्रमविभागः पदद्वयमादाय पूर्वं विसृज्य उत्तरमुत्तरेण संध्यात् यथा अग्निमीळे ईळे पुरोहितं
यज्ञस्य त्वादि स्वरअक्षरविभागः पदविभागः १०० वाभ्रेति गोत्रनामेदं वाशिष्टेन व्याख्यानमोगिरणमेमाराध्य पांचालेन मुनिना १ कंडरीक इति कुलनाम

९२

हिरण्यगर्भो द्युतिमान्यस्यैते छन्दसः सुताः योगैः संपूज्यते नित्यं स एवाहं भुवि स्मृतः ९४ एकविंशतिसाहस्रं ऋग्वेदं मां
प्रचक्षते सहस्रशाखं यत्सामं येवेदविदो जनाः ९५ गायंत्यारण्यके विप्रा मन्द्रकांस्तेहि दुर्लभाः षट्पंचाशतमष्टौ च स
प्तत्रिंशतमित्युत ९६ यस्मिन् शाखा यजुर्वेदे सोहं स्यादाध्वर्यवे स्मृतः पंचकल्पमथर्वाणं कल्पाभिः परिबृंहितं ९७
कल्पयंति हि मां विप्रा अथर्वाणविदस्तथा शाखाभेदाश्च ये केचिद्याश्च शाखासु गीतयः ९८ स्वरवर्णसमुच्चाराः सं
र्वांस्तान्विद्धि मत्कृतान् यत्तद्रूपशिरः पार्श्वसमुद्देति वरप्रदं ९९ सोहमेवांतरेणास्ति क्रमाक्षरविभागवित् वाभ्रोर
शिनमोगिरणमत्प्रसादान्महात्मना पांचालेन क्रमः प्राप्तस्तस्माद्भूतात्सनातनात् १०१ वाभ्रव्यगोत्रः स बभौ प्रथ
मं क्रमपारगः नारायणाद्वरं लब्ध्वा प्राप्य योगमनुत्तमं १ क्रमं प्रणीय शिक्षां च प्रणयित्वा स गालवः कंडरीकोथ
राजा च ब्रह्मदत्तः प्रतापवान् २ जातीमरणजं दुःखं स्मृत्वा स्मृत्वा पुनः पुनः सप्तजातिषु मुख्यत्वाद्योगानां संपदं गत

५

१०४

१ सप्तजन्मिकं जन्मादि दुःखं स्मृत्वा तीव्रतमवैराग्यात् शीघ्रं योगिनां संपदं ऐश्वर्यं गतः प्राप्तः ४ ॥ ॥ ॥ ॥ ॥

६ अपाहरत् नाशितवान् रुद्र इति शेषः ७ शूलं कर्तृ आवयोर् नरनारायणयोः अंतिकात् आगच्छत् आगतं ८ तत्तेजसा शूलतेजसा १० एनं समुद्भू

पुराहमात्मजः पार्थ प्रथितः कारणांतरे धर्मस्य कुरुशार्दूल ततोहं धर्मजः स्मृतः ५ नरनारायणौ पूर्वं तपस्तेपतुरव्ययं धर्मया नं समारूढौ पर्वते गंधमादने ६ तत्कालसमयेष्वेव दक्षयज्ञो बभूव ह नचैवाकल्पयद्भागं दक्षो रुद्रस्य भारत ७ ततो दधी चिवचनाद्दक्षयज्ञमपाहरत् ससर्ज शूलं कोपेन प्रज्वलंतं मुहुर्मुहुः ८ तच्छूलं भस्मसात्कृत्वा दक्षयज्ञं सविस्तरं आवयोः सह सागच्छद्बदर्याश्रममंतिकात् ९ वेगेन महता पार्थ पतन्नारायणोरसि ततः स्वतेजसाविष्टाः केशा नारायणस्य ह १० ब[भू]वुर्मुंजवर्णास्तु ततोहं मुंजकेशवान् तच्च शूलं विनिर्द्धूतं हुंकारेण महात्मना जगाम शंकरकरं नारायणसमा हतं अथ रुद्र उपाधावत्तावृषी तपसान्वितौ ११ तत एनं समुद्भूतं कंठे जग्राह पाणिना नारायणः स विश्वात्मा तेनास्य शि तिकंठता १२ अथ रुद्रविघातार्थमिषीकां नर उद्धरन् मंत्रैश्च संयुयोजाशु सोभवत्परशुर्महान् १३ क्षिप्तश्च सहसा तेन खंड नं प्राप्तवांस्तदा ततोहं खंडपरशुः स्मृतः परशुखंडनात् १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तं उद्धूय आगतं रुद्रं शितिकंठता कंठस्य वर्णस्य नारायण स्पर्शं लब्धवान् नीलकंठत्वं रुद्रो गत इत्यर्थः १२ इषीकैव परशुतां प्राप्ता १३ क्षिप्तश्चाक्षिप्तः तेन रुद्रस्य शू लेन रुद्रेण वा रुद्रस्य खंडपरशुत्वप्रसिद्धिः क्रमेण सत्वादित्यर्थः १४ ॥ ॥

अर्जुनउवाच अस्मिन्युद्धेतुवार्ष्णेयत्रैलोक्यशमनेतदा कोजयंप्राप्तवांस्तत्रशंसैतन्मेजनार्दन १५ श्रीभगवानुवाच तयोःसंलग्नयोर्यु
द्धेरुद्रनारायणात्मनोः उद्विग्नाःसहसाकृत्स्नाः सर्वेलोकास्तदाभवन् १६ नागृह्णात्पावकःशुभ्रंमखेषुसुहुतंहविः वेदानप्रतिभांति
स्मऋषीणांभावितात्मनां १७ देवान्रजस्तमश्चैवसमाविविशतुस्तदा वसुधासंचकंपेचनभश्चविफफालह १८ निष्प्रभाणिचते
जांसिब्रह्माचैवासनाच्च्युतः अगाच्छोषंसमुद्रश्चहिमवांश्चव्यशीर्यत १९ तस्मिन्नेवंसमुत्पन्नेनिमित्तेपांडुनंदन ब्रह्मावृतोदेवगणै
र्ऋषिभिश्चमहात्मभिः २० आजगामाशुतंदेशंयत्रयुद्धमवर्त्तत सोंजलिप्रग्रहोभूत्वाचतुर्वक्त्रोनिरुक्तगः २१ उवाचवचनंरु
द्रंलोकानामस्तुवैशिवं न्यस्यायुधानिविश्वेशजगतोहितकाम्यया २२ यदक्षरमथाव्यक्तमीशंलोकस्यभावनं कूटस्थंकर्तृ
निर्द्वन्द्वमकर्त्तेतिचयंविदुः २३ व्यक्तिभावगतस्यास्यएकामूर्त्तिरियंशुभा नरोनारायणश्चैवजातौधर्मकुलोद्वहौ २४ त
पसामहतायुक्तौदेवश्रेष्ठौमहाव्रतौ अहंप्रसादजस्तस्यकुतश्चित्कारणांतरे २५ त्वंचैवक्रोधजस्तातपूर्वसर्गसनातनः मयाच
सार्द्धंवरदंविबुधैश्चमहर्षिभिः २६ प्रसादयाशुलोकानांशांतिर्भवतुमाचिरं ब्रह्मणात्वेवमुक्तस्तुरुद्रःक्रोधाग्निमुत्सृजन्
२७ प्रसादयामासततोदेवंनारायणंप्रभुं शरणंचजगामाद्यंवरेण्यंवरदंप्रभुं २८ ततोथवरदोदेवोजितक्रोधोजितेंद्रि
यः प्रीतिमानभवत्तत्ररुद्रेणसहसंगतः २९ ऋषिभिर्ब्रह्मणाचैवविबुधैश्चसुपूजितः उवाचदेवमीशानमीशःसजग

[illegible]नोहरिः ३० यस्त्वांवेत्तिसमांवेत्तियस्त्वामनुसमामनु नावयोरंतरंकिंचिन्मा
तेभूद्बुद्धिरन्यथा ३१ अद्यप्रभृतिश्रीवत्सः शूलांकोमेभवत्वयं ममपाण्यंकितश्चापिश्रीकंठस्त्वंभविष्यसि ३२ श्रीभगवानुवाच एवंल
क्षणमुत्पाद्यपरस्परकृतंतदा सख्यंचैवातुलंरुद्रेणसहितावृषी ३३ तपस्तेपतुरव्यग्रौविसृज्यत्रिदिवौकसः एषतेकथितः पार्थ
नारायणजयोमृधे ३४ नामानिचैवगुह्यानिनिरुक्तानिचभारत ऋषिभिः कथितानीहयानिसंकीर्तितानिते ३५ एवंबहुविधैरूपैश्च
रामीहवसुंधरां ब्रह्मलोकंचकौंतेयगोलोकंचसनातनं ३६ मयात्वंरक्षितोयुद्धेमहांतंप्राप्तवान्जयं यस्तुतेसोग्रतोयातियुद्धेसंप्रत्युपस्थि
ते ३७ तंविद्धिरुद्रंकौंतेयदेवदेवंकपर्दिनं कालःसएवकथितः क्रोधजेतिमयातव ३८ निहतांस्तेनवैपूर्वंहतवानसियान्रिपून् अप्र
मेयप्रभावंतंदेवदेवमुमापतिं नमस्वदेवंप्रयतोविश्वेशंहरमक्षयं ३९ यश्चतेकथितः पूर्वंक्रोधजेतिपुनः पुनः तस्मिन्प्रभावेम
वाग्रेयच्छ्रुतंतेधनंजय १५० शांतौमोक्षधर्मेषुनारायणीये शौनकउवाच सौतेसुमहदाख्यानंभवतापरिकीर्तितं यच्छ्रुत्वामुनयः
सर्वेविस्मयंपरमंगताः १ सर्वाश्रमाभिगमनंसर्वतीर्थावगाहनं नतथाफलदंसौतेनारायणकथायथा २ पावितांगाः स्मसंवृत्ता
ः श्रुत्वेमामादितः कथां नारायणाश्रयांपुण्यांसर्वपापप्रमोचनीं २ : ॥ ३॥ ३॥ ॥ ॥ ॥ ॥

दृदृशे भगवान्देवः सर्वलोकनमस्कृतः सनन्दनैः सुरैः कृत्स्नैरन्यैश्चैव महर्षिभिः ४ दृष्ट्वा नारदो यत्र देवं नारायणं ह
रिं नूनमेतद्ध्यनुमतं तस्य देवस्य तत्त्वतः ५ यद्दृष्टवान्जगन्नाथमनिरुद्धतनौ स्थितं यस्माद्दृष्टवसुनर्भूयो नारदो देवसत्तमो नरना
रायणौ द्रष्टुं कारणं तद्ब्रवीहि मे ६ सूत उवाच तस्मिन्यज्ञे वर्त्तमाने राज्ञः पारिक्षितस्य वै कर्मान्तरेषु विधिवद्वर्त्तमानेषु शौनक
७ कृष्णद्वैपायनं व्यासमृषिं वेदनिधिं प्रभुं परिपप्रच्छ राजेन्द्रः पितामहपितामहं ८ जनमेजय उवाच श्वेतद्वीपान्निवृत्तेन
ननारदेन सुरर्षिणा ध्यायता भगवद्वाक्यं चेष्टितं किमतः परं ९ बदर्याश्रममागम्य समागम्य च तावृषी कियन्तं कालमवसत्
कां कथां पृष्टवांश्च सः १० इदं शतसहस्राद्धि भारताख्यानविस्तरात् आमथ्य मतिमन्थेन ज्ञानोदधिमनुत्तमं ११ ॥

नवनीतंयथादध्नोमलयाच्चंदनंयथा आरण्यकंचवेदेभ्यओषधिभ्योमृतंयथा १२ समुद्धृतमिदंब्रह्मन्कथामृतमिदंतथा तपोनिधे
लयोक्तंहिनारायणकथाश्रये १३ सईशोभगवान्देवः सर्वभूतात्मभावनः अहोनारायणंतेजोदुर्दर्शंद्विजसत्तम १४ यत्राविश
न्तिकल्पांतेसेवब्रह्मादयःसुराः ऋषयश्चसगंधर्वायच्चकिंचिच्चराचरं १५ नततोस्तिपरंमन्येपावनंदिविचेहच सर्वाश्रमाभिगम
नेसर्वतीर्थावगाहने १६ नतथाफलदंचापिनारायणकथायथा सर्वथापाविताःस्मोहकृत्स्नेमामाश्रिताःकथां १७ हरेर्विश्वेश्व
रस्येहसर्वपापप्रणाशिनीं नचित्रंकृतवांस्तत्रयदायोमेधनंजयः १८ वासुदेवसहायोपेःप्राप्तवानजयमुत्तमं नचास्यकिंचिद
प्राप्यंमन्येलोकेष्वपित्रिषु १९ त्रैलोक्यनाथोविष्णुःसयस्यासीत्सत्यकृत्सखे धन्याश्चसर्वएवासनब्रह्मंस्तेममपूर्वजाः २०
हितायश्रेयसेचैवयेषामासीज्जनार्दनः तपसाथसुदृश्योपिभगवान्लोकपूजितः २१ यंदृष्टवंतस्तेसाक्षाच्छ्रीवत्साकविभूष
णं तेभ्योधन्यतरश्चैवनारदःपरमेष्ठिजः २२ नचाल्पतेजसमृषिंवेद्मिनारदमव्ययं श्वेतद्वीपंसमासाद्ययेनदृष्टःस्वयंहरिः २३
देवप्रसादानुगतंव्यक्तंतत्रस्पदर्शनं यद्दृष्टवांस्तदादेवमनिरुद्धतनौस्थितं २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

३४ जालपादौ हंसास्यांकितभुजौ हंसपदांकितभुजौ चक्रांकितपादौ ३५ ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कानर

वदरीमाश्रमंयत्तुनारदः प्राद्रवत्पुनः नरनारायणौद्रष्टुंकिंनुतत्कारणंमुने २५ श्वेतद्वीपान्निवृत्तश्चनारदः परमेष्ठिजः
वदरीमाश्रमंप्राप्यसमागम्यचतावृषी २६ कियंतंकालमवसत्प्रश्नान्पृष्टवांश्चह श्वेतद्वीपादुपावृत्तेतस्मिन्वासुमहा
त्मनि २७ किमब्रूतांमहात्मानौनरनारायणावृषी तदेतन्मेयथातत्त्वंसर्वमाख्यातुमर्हसि २८ वैशंपायनउवाच नमो
भगवतेतस्मैव्यासायामिततेजसे यस्यप्रसादाद्वक्ष्यामिनारायणकथामिमां २९ प्राप्यश्वेतंमहाद्वीपंदृष्ट्वाचहरिमव्ययं।
निवृत्तोनारदोराजंस्तरसामेरुमागमत् ३० हृदयेनोद्वहन्भारंयदुक्तंपरमात्मना पश्चादस्याभवद्राजन्नात्मनः साध्व
संमहत् ३१ यद्गत्वादूरमध्वानंक्षेमीपुनरिहागतः मेरोःप्रचक्रामततः पर्वतंगंधमादनं ३२ निपपातचखात्तूर्णंविशालां
वदरीमनु ततः सददृशेदेवौपुराणावृषिसत्तमौ ३४ तपश्चरंतौसुमहदात्मनिष्ठौमहाव्रतौ तेजसाभ्यधिकौसूर्यात्सर्व
लोकविरोचनात् श्रीवत्सलक्षणौपूज्यौजटामंडलधारिणौ जालपादभुजौतौतुपादयोश्चक्रलक्षणौ व्यूढोरस्कौदीर्घ
भुजौतथामुष्कचतुष्किणौ ३५ षष्टिदंतावष्टदंष्ट्रौमेघौघसदृशस्वनौ स्वास्यौपृथुललाटौचसुभ्रूसहनुनासिकौ ३६

आतपत्रेणासदृशे शिरसी देवयोस्तयोः एवंलक्षणसंपन्नौ महापुरुषसंज्ञितौ ३७ तौ दृष्ट्वा नारदो हृष्टस्ताभ्यां च प्रतिपू
जितः स्वागतेनाभिभाष्याथ पृष्टश्चानामयं तथा ३८ बभूवांतर्गतमतिर्निरीक्ष्य पुरुषो[illegible]त्तमौ सदोगतास्तत्र ये वै सर्वभूतनमस्कृ
ताः ३९ श्वेतद्वीपे मया दृष्टास्तादृशावृषिसंमतौ इति संचिंत्य मनसा कृत्वा चाभिप्रदक्षिणं ४० सचोपविविशे तत्र पीठे कु
शामये शुभे ततस्तौ तपसां वासौ यशसां तेजसामपि ऋषीशमदमोपेतौ कृत्वा पूर्वाह्निकं विधि पश्चान्नारदमव्यग्रौ पाद्यार्घ्याभ्या
मर्थार्च्चतः ४२ पीठयोश्चोपविष्टौ तौ कृतातिथ्याह्निकौ नृप तेषु तत्रोपविष्टेषु सदेशोभिव्यराजत ४३ आज्याहुतिमहाज्वालैर्य
ज्ञवाटो यथाग्निभिः अथ नारायणस्तत्र नारदं वाक्यमब्रवीत् सुखोपविष्टं विश्रांतं कृतातिथ्यं सुखस्थितं ४४ नरनारायणा
उचतुः अपीदानीं स भगवान्परमात्मा सनातनः श्वेतद्वीपे त्वया दृष्ट आवयोः प्रकृतिः परः ४५ नारद उवाच दृष्टो मे पुरुषः
श्रीमान्विश्वरूपधरोऽव्ययः सर्वे लोका हि तत्रस्था यथा देवाः सहर्षिभिः ४६ अद्यापि चैनं पश्यामि युवां पश्यन्सनातनौ यैर्ल
क्षणैरुपेतः स हरिरव्यक्तरूपधृक् ४७ ॥